 ISSN 2320-2025

# संस्कृतालंकारशास्त्रेषु काव्यस्वरूपविमर्शः

अर्पिता नाथ
सहायिकाध्यापिका
संस्कृतविभागः
वासन्तीदेवीविद्यालयः
Email id-arpita.nath111@gmail.com

## शोधसारः

भाषायाः व्युत्पत्तिर्बोधनाय यथा व्याकरणशास्त्रमावशक्यम् तथैव संस्कृतसाहित्यजगति विद्यमानस्य काव्यसम्भारस्य स्वरूपज्ञानाय अलङ्कारशास्त्रमावश्यकम्। अलङ्कारमिति पदेन भूषणं बोध्यते। आचार्येण वामनेनोक्तं- सौन्दर्यमलंकारः। यस्मिन् शास्त्रे काव्यगतसौन्दर्यस्य पर्यालोचनं क्रियते तच्छास्त्रम् अलंकारशास्त्रमित्युच्यते। शास्त्रमिदं साहित्यशास्त्रं काव्यशास्त्रं वेति नाम्नापि प्रसिद्धम्। काव्यस्वरूपं, काव्योत्पत्तेः कारणं, काव्यस्य प्रयोजनं, काव्यभेदाः, ओज-प्रसादादि काव्यगुणाः, रीतयः, यमकोपमादयः पारिभाषिकालंकाराः - प्रभृतयः विभिन्नविषया अलंकारशास्त्रेषु समुपलभ्यते। कवेः कर्म काव्यम्। कविः स्वकीयप्रतिभाबलेन काव्यं जनयति। शब्दः एव काव्यशरीरम्। शब्दमाश्रित्य रचिते काव्ये कथमानन्दविधायको धर्मः आगच्छतीति प्रश्नो विद्वत्जगति नितरां विस्मयं जनयति। अथ काव्यस्यात्मानुसन्धानार्थं पण्डिताः यतन्ते। भरताचार्यतः जगन्नाथपर्यन्तं बहूनामालंकारिकाणां बहवो ग्रन्थाः विद्यन्ते। अलंकारशास्त्रजगति षट्-प्रस्थानमस्ति। ते यथा- रसप्रस्थानम्, अलंकारप्रस्थानम्, गुणप्रस्थानम्, रीतिप्रस्थानम्, व्रकोक्तिप्रस्थानम्, ध्वनिप्रस्थानमञ्च। एतेषु षट्-प्रस्थानेषु काव्यस्वरूपविषयकं कीदृशमालोचनं लभते तदेव शोधसारस्य आलोच्यविषयः।

**शब्दकुञ्चिका**- अलंकारः, प्रस्थानम्, काव्यम्, रसः, गुणः, रीतिः।

अपारे काव्यसंसारे कविरेव प्रजापतिः।

यथा वै रोचते विश्वं तथेदं परिवर्त्तते।।[1]

काव्यं तथा साहित्यं विशिष्टात्मकं रचनासम्भारम्। एतादृशं काव्यं स्वकीयमाहात्म्येन वाक्याद् विलक्षणमेव। काव्यस्य स्रष्टा कविरेव। अतएव इदं वक्तुं शक्यते यत्- परम्परानुसारेण काव्यसंसारे लोकोत्तरवर्णनानिपुणकविकर्म एव काव्यम्। एतादृशस्य काव्यस्य किं स्वरूपमिति स्वाभाविकी जिज्ञासा समुत्पद्यते। √कु धातोरुत्तरं यत् प्रत्यययोगेन काव्यमिति पदं सिध्यति। अस्य धातोरर्थः –वर्णनम्, चित्रणं च। वैदिकविद्वत्मतानुसारेण कविः क्रान्तदर्शी एव। अनाद्यनन्ते विश्वे कविः साक्षात् स्रष्टा प्रजापतिरेव। प्राचीनकालादारभ्य अद्यतनकालेऽपि कवीनां ख्यातिः प्रसिद्धा एव। कवेः प्रतिभायाःनिदर्शनं काव्यं खलु। तत्र प्रतिभा द्विविधा- सहजा उत्पाद्या च। सहजा प्रतिभा जन्मान्तरागतः संस्कारविशेषः। उच्यते काव्यमीमांसाकारेण- जन्मान्तरसंस्कारापेक्षिणी सहजा।[2] कवीनां पाण्डित्यमपि च काव्यपाठेन काव्यरचनया च पुनः पुनः अभ्यासेन लब्धा प्रतिभा उत्पाद्येति। उत्पाद्या प्रतिभा काव्यमीमांसाकारमतानुसारेण औपदेशिकी प्रतिभेति। काव्यमीमांसायामुक्तम्- मन्त्रतन्त्राद्युपदेशप्रभवा औपदेशिकी।[3] कवेः

[1]अग्निपुराणम् -३३९/१०

[2]काव्यमीमांसा- ४/१३, पृ-८२

[3]तत्रैव

वाग्वैदग्ध्यमेव सत्काव्यस्य जीवनम्। केवलं कविप्रतिभा हि काव्योत्पत्तेः कारणमेतद्विषये आलंकारिकेषु कोऽपि मतानैक्यं नास्ति। परन्तु काव्यस्वरूपनिर्माणविषये आलंकारिकाणां सर्वथा न समदर्शनमस्ति। अतः विविधेषु अलंकारग्रन्थेषु काव्यलक्षणविषये विविधानि लक्षणानि दृश्यन्ते। एवंविधेषु विशेषलक्षणेषु कानिचिल्लक्षणानि शब्दमात्रगतानि कानिचिच्च शब्दार्थोभयगतानि सन्ति। संस्कृतालंकारशास्त्रेषु नाट्यशास्त्रकार-भरताचार्यतः पण्डितराज-जगन्नाथपर्यन्तं षष्ठख्रीष्टपूर्वाब्दतः अष्टादशख्रीष्टाब्दकालं व्याप्य सुदीर्घकालं यावत् काव्यतत्त्वविषये सुविस्तृतमालोचनं दृश्यते। सर्वे विद्वांसः काव्यस्यात्मानुसन्धानविषये विशेषतया यतन्ते।

अथ काव्यसंज्ञितानां कविकर्मणां कोऽपि स्वतन्त्रोऽपि वर्गोऽस्ति। वर्गानेतान् प्रस्थाननाम्ना प्रसिद्धाः। षड्प्रस्थानानि सन्ति। ते च-

1.रसप्रस्थानम्
2.अलंकारप्रस्थानम्,
3.गुणप्रस्थानम्
4.रीतिप्रस्थानम्
5.व्रकोक्तिप्रस्थानम्
6.ध्वनिप्रस्थानम्

काव्यस्य लक्षणप्रदानप्रसङ्गेन कतिपयानां पण्डितानां मध्ये गुणालंकारादीनां बाह्यङ्गानामेव गुरुत्वं परिलक्ष्यते। एतेषु पण्डितेषु आचार्यः दण्डी, आचार्यवामनः, भामहः, रुद्रटः, उद्भटश्चप्रधानतमः। कालक्रमेणोत्तरोत्तरं काव्यस्यान्तर्गतं मनोहारित्वं तथा आन्तसौन्दर्यानुसन्धानविषये विशेषप्रयन्तं परिदृश्यते। तत्र शब्दमात्रगतानि काव्यलक्षणानि तानि यथा-

आचार्येण भामहेन कथितं काव्यलक्षणम्- **शब्दार्थौ सहितौ काव्यम्।**[4]

काव्यादर्शे आचार्यदण्डिनोक्तम्-

**तैः शरीरं काव्यानामालङ्काराश्च दर्शिताः।**

**शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली।।**[5]

काव्यालङ्कारसूत्रवृत्तिग्रन्थे वामनकथितं काव्यलक्षणम्- **रीतिरात्मा काव्यस्य।**[6]

पुनः काव्यालङ्कारसूत्रवृत्तिग्रन्थे वामनेनोक्तम्- **काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः वर्तते। भक्त्या तु शब्दार्थवचनमात्रोऽत्र गृह्यते।**[7]

रुद्रटाचार्येण काव्यालङ्कारे उक्तम्- **शब्दार्थौ काव्यम्।**[8]

अग्निपुराणोक्तं काव्यलक्षणम्-

**संक्षेपाद्वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।**

**काव्यं स्फुटदलङ्कारं गुणदोषवर्जितम्।।**[9]

कुन्तकेन वक्रोक्तिजीविते-

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनी।**

---

[4]काव्यालङ्कारः- १/१६

[5]काव्यादर्शः- १/१०

[6]काव्यालङ्कारसूत्रवृत्तिः- १/२/६

[7]तदेव-१/१/१

[8]काव्यालङ्कारम्- २/१

[9]अग्निपुराणम्- ३३७/६

**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।**[10]

काव्यानुशासने हेमचन्द्रेण काव्यलक्षणविषये उक्तम्- **अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्।**[11]

ध्वन्यालोककारानन्दवर्धनाचार्येण काव्यस्य लक्षणं कृतम्- **सहृदयहृदयाह्लादि शब्दार्थमयत्वमेव काव्यलक्षणम्।**[12]

पुनः आनन्दावर्धनाचार्येनोक्तम्– **काव्यस्यात्मा ध्वनिः।**[13]

काव्यप्रकाशकार-मम्मटाचार्येनोक्तम्- **तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।**[14]

काव्यलक्षणप्रसङ्गेन भोजराजेनोक्तं सरस्वतीकण्ठाभरणग्रन्थे-

**निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्।**

**रसान्वितं कविः कुर्वन्कीर्तिं प्रीतिं च विन्दति।।**[15]

क्षेमेन्द्रोऽपि काव्यस्य लक्षणे विशिष्टशब्दार्थेन सह अलंकारप्रयोगस्य प्रयोजनं कथयति। तस्य मतानुसारेण– काव्यं विशिष्टशब्दार्थसाहित्यसदलङ्कृतिः।

---

[10]वक्रोक्तिजीवितम्- १/१

[11]काव्यानुशासनम्- पृ-१६ द्रष्टव्यम्

[12] ध्वन्यालोकः- १/१ (वृत्तिः)

[13]ध्वन्यालोकः- १/१

[14]काव्यप्रकाशः-१/४

[15]सरस्वतीकण्ठाभरणम्-१/२

काव्यलक्षणप्रदानप्रसङ्गेन बाह्यधर्मयुक्तं शब्दार्थयोः अधिकं आन्तरधर्मरूपेण काव्यस्यात्मानुसन्धानार्थं रसस्योपस्थितिविषये ये ये आलंकारिका आलोचितवन्तः तेषु आचार्यविश्वनाथः, पण्डितराजः जगन्नाथः खलु प्रमुखः एव। नाट्याचार्य-भरतप्रवर्तितं रसप्रस्थानमवलम्ब्य ते आलंकारिकाः मुख्यतया काव्ये रसस्य गुरुत्वं निर्दिष्टवन्तः।

तैः प्रदत्तानि काव्यस्य लक्षणानि यथा- विश्वनाथकथितं काव्यलक्षणम्- **वाक्यं रसात्मकं काव्यम्**।[16]

जगन्नाथप्रदत्तं काव्यलक्षणम्- **रमणीयार्थप्रतिपादकः शब्दः काव्यम्**।[17]

इत्थमालंकारिकाणां मतान् पर्यालोच्य इदं वक्तुं शक्यते यत्- प्राचीनकालादारभ्य अद्यावधि विविधैः पण्डितप्रवरै आलंकारिकैः काव्यपरिभाषाः कृताः, किन्तु न ताः सर्वथा शुद्धाः। पुर्वोक्तेषु सर्वेषु काव्यलक्षणेषु वैचित्र्यमस्ति। एतेषु काव्यलक्षणेषु विरोधोऽस्ति। कतिपया आलंकारिकाः काव्यलक्षणे शब्दमात्रगतं सौन्दर्यं पूर्वपक्षीरूपेणाङ्गीकृत्य शब्दार्थोभयगतं काव्यलक्षणं सिद्धान्तपक्षीरूपेण स्वीकृत्य आदौ भामहकृतं काव्यलक्षणमुपस्थाप्यते-

काव्यालङ्कारे भामहाचार्यः कथयति- **शब्दार्थौ सहितौ काव्यम्** इति। एतल्लक्षणं तु सामान्यजातीयं केवलं स्वरूपव्याख्यात्मकं, न च सर्वथा सम्पूर्णमेव। काव्ये शब्दार्थयोः सममर्यादायाः प्रथमः समर्थकः खलु आचार्यः भामहः। सः सत्काव्ये पारिभाषिकालंकारप्रयोगस्य गुरुत्वं स्वीकृतवान्। परवर्तिनि काले तस्याभिमतस्य समर्थकाः खलु- रुद्रटः, उद्भटः प्रमुखाः। काव्यस्य लक्षणविषये भामहकृतं काव्यलक्षणं न सर्वथा दोषमुक्तम्। अतः काव्यलक्षणमिदं काव्याकाव्यनिर्णये न समर्थः।

---

[16]साहित्यदर्पणम्-१/३

[17]रसगङ्गाधरः- प्रथमाननम्, पृ- ४

दण्डिकृतं काव्यलक्षणं - **शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली।** लक्षणेऽस्मिन् **इष्टपद-**प्रयोग एव भामहलक्षणात् विशिष्टः। प्रधानतः लक्षणमिदं भामहस्य व्याख्यानमवलम्ब्य कृतम्। अतएव दण्डिकथितं काव्यलक्षणं पण्डितेषु समादरं लभते।

मम्मटकृतं काव्यलक्षणञ्च- **तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।** मम्मटमतानुसारेण दोषमुक्तौ गुणयुक्तौ अलंकारसहितौ क्वचित् स्फुटालंकाररहितौ शब्दार्थौ काव्यमिति। तस्य मतेन शब्दार्थौ एव काव्यशरीरम्। मम्मटाचार्यः काव्यलक्षणे काव्यत्वधर्मं शब्दार्थयोरुपरि आरोपितवान्। पुनः सः काव्ये रसानां गुरुत्वमपि आलोचितवान्। प्रसङ्गेऽस्मिन् तेन कथितम्-

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।

उत्कर्षहेतवस्तेस्युरचलस्थितयो गुणाः।।[18]

काव्यप्रकाशस्यान्तर्गतां कारिकामनुसृत्य वक्तुं शक्यते यत्- काव्ये यद्यपि गुणालंकारयो आवश्यकतास्ति तथापि रस एव काव्यस्य मुख्यधर्मः। यत्र रसो नास्ति तत्र गुणोऽपि नास्त्येव रसनैयत्वम्, रसाभावव्यापकीभूताभावप्रतियोगित्वमिति यावत्।[19] अतएव चमत्कारपूर्णौ सुललितौ शब्दार्थौ एव काव्योत्पत्तेः समर्थौ तु तदुद्भावने सहायकमात्रौ प्रमुखौ[20]। अतः काव्यस्य स्वरूपनिर्णये शब्दार्थयोरतिरिक्तं काव्यस्यात्मानुसन्धानं कुर्वन् ध्वनिकारेण आनन्दवर्धनाचार्येणोक्तम्- काव्यस्यात्मा ध्वनिरिति। काव्यमीमांसाकारः राजशेखरोऽपि कथितवान्-

---

[18]काव्यप्रकाशः-८/६६

[19]द्रष्टव्यः- अलङ्कारशास्त्रस्येतिहासः, पृ-२०५

[20] संस्कृतकाव्यशास्त्रेतिहासः , पृ-४८

शब्दार्थौ ते शरीरं, संस्कृतं मुखं, प्राकृतं बाहुः, जघनमपभ्रंशः, पैशाचं पादौ, उरो मिश्रम्। समः प्रसन्नो मधुर उदार ओजस्वी चासि। उक्तिचणं ते वचो, रस आत्मा...।[21]

काव्यलक्षणे रसस्य प्राधान्यं मुख्यतया विश्वनाथाचार्येण कृतम्। तेनोक्तम्- '**वाक्यं रसात्मकं काव्यम्**'। स भामहादीनां पूर्वाचार्याणां काव्यलक्षणं खण्डनपूर्वकं स्वकीयमतमुपस्थापितवान्। एतद् लक्षणानुसारेण रसयुक्तं वाक्यं काव्यमेव। रसपदेनात्र संलक्ष्यभेदानां सर्वेषां परिग्रहः। तथा च व्यञ्जकसम्बन्धेन रसादिमयवाक्यमेव काव्यमिति काव्यस्य सामान्यलक्षणम्। एवञ्च 'न्यक्कारोऽह्ययमेव मे यदरयः' इति श्लोकेऽसंलक्ष्यक्रमात्मकनिर्वेदाख्य सञ्चारिभावस्य विद्यमानत्वात्, अपि च 'यः कौमारहरः...' इत्यत्रापि शृङ्गारस्य विद्यमानत्वात् तु रसभाववत्वाच्च न अव्याप्तिः। देवदत्तो ग्रामं याति इति वाक्ये च रसाद्यभावात् न अतिव्याप्तिः।

एतदनन्तरमायाति पण्डितराजजगन्नाथस्य काव्यलक्षणम्- **रमणीयार्थप्रतिपादकः शब्दः काव्यम्** इति। अर्थात् कविप्रतिभया अलौकिकचमत्कारकारणेन मनोहरस्यार्थस्य वाच्यलक्ष्यव्यङ्ग्यान्तरस्य प्रतिपादकः समुद्भावकः शब्दः काव्यमिति जगन्नाथकथितं काव्यलक्षणम्। अत्र रमणीयाः लोकोत्तरानन्दजनकभावना विषयाः ये अर्थाः तद्बोधकजनकः शब्दः काव्यमिति लक्षणार्थः। रमणीयता इति शब्दस्य व्याख्याप्रसङ्गेन जगन्नाथेनाह- रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता। किन्तु एतन्मतमपि खण्डितं सुरिभिः। तेषां मतानुसारेण- काव्यस्य योजनारूपत्वात् व्यासज्यवृत्तित्वकल्पनातिप्रयोजना। काव्यद्वयतव्यवहारापत्तिरपि

[21]काव्यमीमांसा, तृतीयाध्यायः, पृ-४४

निर्मूला। विजातीयैकचमत्कृतिजनकत्वेन एकस्यैव व्यवहारात् सहकारित्वं तूभयत्राप्युभयोः। वेदादिलक्षणमपि शब्दार्थोभयनिष्ठमेवास्ति। ...काव्यलक्षणे न दोषभाक् तन्निवेशः।[22]

अतः काव्यस्वरूपनिरूपणप्रसङ्गेन काव्यस्यात्मा कः? इत्येषः प्रश्नः समुपस्थापितः आसीत्। इत्येतस्याः समस्यायाः समाधानार्थं बहवः पण्डिताः बहूनि मतानि कथितानि सन्ति। तेषु केचन अलंकारमेव काव्यस्य जीवनं मन्यन्ते, इतरे गुणान्, तदन्ये रीतिः, तदपरे च ध्वनिः काव्यस्यात्मारूपेण विचारयन्ति। एतत् समीक्षायाः विभिन्नतावशात् नवनवसम्प्रदायानां उत्पत्तिरभवत्। एतेषु सम्प्रदायेषु रसवादीनां मतमधिकतररूपेण ग्रहणीयमभवत् पण्डितमहले।

**उपसंहारः-** काव्यस्यात्मासम्बन्धे विभिन्नपक्षेभ्यः सम्प्रदायेभ्यः आगतानि तत्त्वानि विचार्य एतत् वक्तुं समुचितं यत्- काव्यस्यानन्दविधायकधर्म एव काव्यस्य प्रधानमुपजीव्यम्। अतः काव्ये रसः एव अङ्गी, तदेव काव्यस्यान्तरङ्गधर्मः। गुणः, रीतिः, अलंकारश्च काव्यस्य सौन्दर्यवर्धकं धर्मः एव। काव्ये रस एव जीवितम्। अतः सर्वेषु प्रस्थानेषु रसप्रस्थानस्य गुरुत्वं समधिकम् – एतद्विषये वैमत्यं नास्ति।

## निर्वाचितग्रन्थपञ्जी

### मुख्यग्रन्थाः

*अग्निपुराणम्*, पञ्चाननतर्करत्नः(सम्पादकः), द्वितीयसंस्करणम्, १४१९ वङ्गाब्दः, नवभारत पावलिशार्स, कोलकाता

*काव्यादर्शः*, चिन्ययी चट्टोपाध्यायः(सम्पादकः), द्वितीयसंस्करणम्, २०१८ खीष्टाब्दः, पश्चिमवङ्ग-राज्य -पुस्तक-पर्षत्, कलकाता

---

22 संस्कृतकाव्यशास्त्रेतिहासः , पृ-५०

*काव्यप्रकाशः,* विपदभञ्जनपालः(सम्पादकः), द्वितीयप्रकाशः, १४२४ वङ्गाब्दः, संस्कृत पुस्तक भाण्डारः

*काव्यमीमांसा,* उदयचन्द्र वन्द्योपाध्यायः(सम्पादकः), प्रथमप्रकाशः, २०१४ खीष्टाब्दः, संस्कृत वुक डिपो, कलकाता

*ध्वन्यालोकः,* विमलाकान्तमुखोपाध्यायः(सम्पादकः), परिमार्जितसंस्करणम्, २००८ खीष्टाब्दः, संस्कृत पुस्तक भाण्डारः, कलकाता

*नाट्यशास्त्रम्,* अञ्जलिकामुखोपाध्यायः(सम्पादकः), प्रथमप्रकाशः, २०१८ खीष्टाब्दः, संस्कृत पुस्तक भाण्डारः, कलकाता

*वक्रोक्तिजीवितम्,* अञ्जलिकामुखोपाध्यायः(सम्पादकः), सदेशसंस्करणम्, २०१० खीष्टाब्दः, सदेश, कलकाता

*रसगङ्गाधरः(प्रथमाननम्)*, वद्रीनाथझा(सम्पादकः), सप्तमसंस्करणम्, १९९० खीष्टाब्दः, चौखम्बा विद्याभवन, वाराणसी

सरस्वतीकण्ठाभरणम्, केदारनाथ शर्मा, २य संस्करणम्, १९३४, पाण्डुरङ्ग जवाजी, बोम्बाइ

*साहित्यदर्पणम्,* विमलाकान्तमुखोपाध्यायः(सम्पादकः), २यसंस्करणम्, २०१३ खीष्टाब्दः, संस्कृत पुस्तक भाण्डारः, कलकाता

**गौणग्रन्थाः**

दास, रवीन्द्र, के, *काव्यशास्त्र और साहित्य समालोचना,* प्रथमसंस्करणम्, २०१९खीष्टाब्दः, चौखम्बा सुरभारती प्रकाशन, वाराणसी

दाहाल, लोकमणि, सं*स्कृतसाहित्येतिहासः,* १म संस्करणम्, चौखम्बा कृष्णदास अकादेमी, वाराणसी

वन्द्योपाध्यायः, धीरेन्द्रनाथः, सं*स्कृत अलंकारशास्त्र तत्त्व ओ समीक्षा,* प्रथमप्रकाशः, २०१२ खीष्टाब्दः, पश्चिमवङ्ग-राज्य -पुस्तक-पर्षत्, कलकाता

मिश्रः, जगदीशचन्द्रः, *संस्कृतकाव्यशास्त्रेतिहासः*, प्रथमप्रकाशः, २०१५, चौखम्बा सुरभारती प्रकाशन, वाराणसी

Kane, P.V, *History of Sanskrit Poetics,* 5th Rpt, 2015, MLBD, Delhi

# MANGALACHARANA OF AMARUSHATAKA: A STUDY

**Dr.Preeti R. Pujara**
**Asst. Professor**
**Dept. of Sanskrit**
**D.C.M. Arts & Commerce College, Viramgam.**

(*key words: Shringararasa, poetic beauty, shiva's valour,* contradictory *rasas, poetic blemishes, fusion of twin rasas, poetic excellence,to heighten the effect of virarasa, i.e Shiva's valour, the example of संकीर्णरसवद्, the true touch stone of a poet)*

The hallmark of literature is the quality that reflects a variety of emotions and Amruka's *Mangalacharana* is an outstanding example of two kinds of *rasas* evoked together. Amaruka being an excellent poet and rhetorician acquired a unique place in the Sanskrit literature. His *Amarushataka* is an example of *Muktak Kavya.* All his 100 verses are written on the theme of art of lovemaking and various facets of love. Most of his verses delineate *Shringararasa*. Erotic rasa is on full display in his work *Amrushataka*.

Amaruka's work provides the raw material to understand the poetic elements in depth. Not only that his verses are often quoted by great rhetoricians like Mammata, Anaadavardhana and even Vamana. While describing the various elements like *rasa, alamkara,* metres,Amaruka's verses are quoted by many poets time and again to bring out

the merits and demerits of *Kavya*. His verses are the best examples to understand the types of *Nayikas* as described by Dhananjay and Vishvanatha.The ninth-century literary critic Anandavardhana declared in his ‘*Dhvanyaloka*’ that "a single stanza of the poet Amaruka may provide the taste of love equal to what's found in whole volumes." Its verses have been used by poets and critics as examples and standards to judge other poems.

The present paper aims to study the second verse of *Amrushatakain* the form of *Manglacharana*. This shloka of Amaruka is unique as it elevates the poetic beauty to an unprecedented level. The great rhetoricians viz Mammata, Vishvanatha, Ananadavardhana and Kuntaka have discussed and debated the poetic beauty of *Manglacharana* from the stand point of *rasa* theory. It is quite an interesting study to decipher the poetic elements as discussed by these great rhetoricians.

Actually, *Manglacharana* of *Amarushataka* praises the glory of lord shiva who burnt the Tripura, the citadel of the demons. In this introductory verse, Shiva’s valour resplendent with ***Virarasa**,* is predominantly seen.

It becomes very much necessary to understand the translation and literal meaning of the second verse of *Amrushataka*. It goes like this ---

**क्षिप्तोहस्तावलग्नःप्रसभमभितोऽप्यादादानोंऽशुकान्तं**

**गृह्णन्केशेश्वपास्तश्चरणनिपतितोनेक्षितःसंभ्रमेण ।**

**आलिङ्गन्योऽवधूतस्त्रिपुरयुवतिभिःसाश्रुनेत्रोत्पलाभिः**

**कामीवार्द्रापराधः स दहतुदुरितंशांभवोवःशराग्निः ||**[1]

Translation:

May the fire emerging from the arrow of Lord Shiva resemble the lover whose betrayal is still moist destroy all our troubles. The same fire is pushed away by the wives of demons whose eyes are filled with tears when it touches their hands, was cast aside by them when it holds the fold of their sari, was warded off by the wives of the demons when it engulfs their hair and was totally ignored by them because of fear even though lying at their feet.

Mammata, the author of *Kavyaprakasha*, cites the above *shloka* of Amaruka in seventh chapter of *Kavyaprakasha* named *doshadarshanam.*

While describing the poetic blemishes, *kavyadoshas,* Mammata says that delineation of two contradictory *rasas* in poetry always gives rise to *kavya dosha.* It is not acceptable to describe two contradictory *rasas*in the same poetry. But in some special circumstances, this fault can be absolved and the delineation of two contradictory *rasas* will not harm the poetic beauty.

These are the conditions where the description of two contradictory *rasas* will not be treated as blemishes as stated by Mammata in the seventh chapter of *kavyaprakasha* in *karika* 65.

**स्मर्यमाणोविरुद्धोऽपिसाम्येनाथविवक्षितः**

**अङ्गिन्यङ्गत्वमाप्तौयौतौनौदुष्टौपरस्परौ** ||[2]7.65

If two contradictory *rasas* are described in the flash of past memory or past experience, they will not affect the poetic beauty. He further adds if two contradictory *rasas* are

explained by showing some kind of similarity or they are expressed with *upamana- upmeya bhava* between them they will not be considered contradictory. Besides if two contradictory *rasas* are made subordinate to one major rasa of poetry, it will not harm the poetic excellence or the contradiction of two rasas will be pardonable.

To justify his above mentioned three conditions Mammata, gives three examples from various texts and also from Amaru"s *shloka* क्षिप्तोहस्तावलग्नःetc. According to Mammata, "two contradictory *rasas,* when made subordinate to one common and major *rasa* of the poetry, nullifies the contradiction and do not harm the poetic beauty.

In this example, the heroism and valour of lord Shiva is clearly expressed and *vira-rasa* is predominant. But is also reflected in the description of the pitiable condition of the wives of demons who were shedding tears (साश्रुनेत्रोत्पलाभिः) when their husbands were burnt alive by the fire shot out from the arrow of lord Shiva. The whole incident of *Karuna rasa* has become subordinate to *vira rasa* as in the whole poetry the extra ordinary heroism of lord Shiva seems to be the major inclination of the poet.

Mammata rightly states

**'त्रिपुररिपुप्रभावातिशयस्यकरुणोङ्गम्, तस्यचशृङ्गारः, तथाऽपिनकरुणेविश्रान्तिरितितस्याङ्गतैव|'[3]**

Even Maheshvar Bhattacharya in his commentary "Adarsha" on *Kavyaprakasha* also notes that –

**अत्रेति,प्रभावातिशयोऽत्रवक्तुस्तद्विषयः प्रकृष्टोभावः| करुण इति, तासांशोच्यावस्थाज्ञातरिवक्तरिकरुणः , स च त्रिपुररिपुप्रयोज्यत्वात्तद्विषयभावप्रकर्षत्वेन अङ्गम् |**[4]

Apart from this, we can also perceive the delineation of *shringararasa*in this *shloka.*

The behaviour of fire is identical with the behaviour of a passionate lover. Women of Tripura (whose eyes are filled with tears) push the fire when it touches their hands, cast aside the fire when it holds their fold of saree, wards it off when it engulfs their hair and they totally ignore the fire because of fear even though lying at their feet. Amaruka here illustrates a fusion of twin rasas viz. *shringara* and *karuna.* The behaviour of fire is identical with the behaviour of lover and the feeling associated with the *shringar* rasa immediately emerges. When the lover goes near to beloved, she pushes him, when he holds the fold of saree, the beloved again drives him out and the beloved wards him off when the lover holds her with hair and again when the lover is pleading his beloved and falling flat at her feet is ignored by the beloved.

Though the poetry has the excellent delineation of *shringara rasa,* the*karuna rasa* overpowers this *shringara*and it doesn't appeal much. So, this *shringara rasa* is made subordinate to even *karuna rasa*. *shringara rasa* did not reach the final stage of *rastva*and hence *shringara rasa* is also considered as the subordinate one (anga) and not the major *rasa* (angi).*Shringara and karuna* are considered as the contradictory *rasas,* yet they are delineated in the same piece of poem.

Ultimately both *shringara and karuna* are employed together to heighten the effect of *virarasa*,i.e *Shiva's* valour. Here in this example two contradictory *rasas*, *karuna* and *shringara* being subordinate to major *rasa*,ie. *vira,* the contradiction of two *rasas* is eradicated and this is according to Mammata is an appropriate example of विरोधरसपरिहार.

Now we can take the view of Anandvardhana on the same *shloka*of Amaruka. Anandvardhana, the author of *Dhvnyaloka* quotes the same *shloka* of Amaruka while explaining the field of *rasvad alamkara*. The following *karika* of *Dhvnyaloka* explains the sphere of *rasvad alamkaar*.

**प्रधानेऽन्यत्रवाक्यार्थेयत्राङ्गंतुरसादयः |**

**काव्येतस्मिन्नलङ्कारोरसादिरितिमेमतिः||**[5] 2.5

(Dhvnyaloka)

When the principal meaning is different and the *rasa, bhava, alamkara* etc.(रसादि) are subordinate or secondary to the principal meaning there definitely prevails the area of *rasavad alamkara.* According to Anandvardhana, such *rasvad alamkara* has two varieties. 1. शुद्धरसवद् २. संकीर्णरसवद्

When single *rasa* or *alamkara, bhava* etc. helps to develop principal meaning of the poetry that is an example of शुद्धरसवद्, while two or more *rasas* or *alamkaras* etc. function to strengthen the principal meaning of the poetry that is an area of संकीर्णरसवद्. Anandvardhan while giving the example of संकीर्णरसवद् *alamkara,* quotes Amaruka's *shloka* क्षिप्तोहस्तावलग्नः.... etc.

Here in the *shloka*, poet's clear-cut intention is to celebrate the supremacy and power of lord Shiva. But the author has also employed two more*rasas*- *karuna* and *shringara.* The phrase "साश्रुनेत्रोत्पलाभिः" indicates the emergence of *karunarasa.* At the time of ***Tripurdahan*** when the fire emanating from lord Shiva's arrow burnt the demons alive and their wives were distressed by the acts of fire. This whole incident unfolds the *karuna rasa.* It is interesting to note here that in the phrase "कामीवार्द्रअपराधः",*shrinagara rasa* is also reflected through the identical behaviour of ardent lover and fire (*through Shleshopma*)is subordinate to even *karuna rasa.* And inthe case of *Karuna rasa*, it is also not absolute abode of *rasatva* it doesn't reach to its zenith, highest point *(rastva)* it remains yet in the stage of *bhava*. This *karuna* is just the component of *utsaha bhava* which is exhibited by Shiva at the time of the incident of ***Tripuradahan.***

Thus, According to Dhvanikar both the *rasas* viz. *karuna* and *shringara* delineated in this example are just the complementary components of the poet's devotion towards Lord shiva and they are just the helping factors in the development of the enthusiastic gesture (उत्साहभाव)exhibited by the Lord shiva in the act of ***Tripura dahan.***

Thus, according to Anandvardhana, this is a proper example of *samkeerna rasvad alamkara as karuna, shringara and shlesha alamkara,* three poetic elements are blended here to heighten the principal meaning (मुख्यार्थ) i.e., infinite power of Lord Shiva.

Now we can study the perception of Vishvanatha, the author of *Sahitya Darpan*on the same shloka of Amaruka viz. **क्षिप्तोहस्तावलग्नः....** etc. He quotes the shloka while giving solution to the problem viz. the delineation of two contradictory rasas always creates a poetic blemish (***kavyadosh)*** in the poem. The seventh chapter of Sahitya Darpan is all about *kavyadosha. Karika* 30 of seventh chapter of *Sahityadarpana* describes:

**विरोधिनोऽपिस्मरणेसाम्येनवचनेऽपिवा |**

**भवेद्विरोधोनान्योन्यमङ्गिन्यङ्गतवमाप्तयोः** ||[6]७.३०. (sahityadarpana)

Vishvanatha holds similar opinion as Mammata. This *Karika*of Vishvanatha also gives three conditions to eradicate *kavyadosh*a called "description of two contradictory rasas simultaneously in a poetry."

When two contradictory *rasas* or *bhavas* are described in poetry through the past memory.

When two contradictory *rasas* are described in one poetry through some kind of similarity between them.

When two contradictory *rasas* described in a poem are made subordinate to the principal *bhava* or *rasa* of the poem.

While explaining the third condition, viz. the description of two contradictory *rasas* at one platform will not cause poetic blemishes, if these *rasas* are made subordinate to the major *bhava* or *rasa,* the *shloka* क्षिप्तोहस्तावलग्नः.... etc .is quoted by Vishvanatha to substantiate the theory of poetic blemishes.

In this *shloka* क्षिप्तोहस्तावलग्नः, major *bhava* is poet's love and gratitude towards lord Shiva **(शिवविषयकरतिभाव)**this *bhava* is nourished by Shiva's enthusiasm (उत्साहभाव) viz. **Tripuradahan**

The Poet's prime intention is to celebrate the supremacy of Shiva. While doing so, emergence of *karuna rasa* or *shringra rasa* or even simile etc. are just the strengthening factors in the development of '*utsahbhava'* of shiva viz. ***Tripiurdahan*** *a*ct at its zenith.

We avoid here to describe how *shringara, karuna and upma alamkara* come to pass in the same *shloka* as it is already stated while describing the opinion of Mammata in the same article.

Thus, according to Vishvanatha this *shloka* is an example of mere bhava and not rasa. शिवविषयकरतिभावis the major bhava of the poem and it is nourished here by shiva's ***utsaaha***viz. ***Tripuradahan.*** And this उत्साहभाव is not fed by*anubhava*, *vibhava* etc. so it has not obtained the status of *rasa.* The occurrence of *karuna rasa* in the description of demons' wives who are distressed by the act of fire has become subordinate to this ***utsahabhava*** of Shiva. And the occurrence of *shringara*rasa, in the identical behaviour of lover and fire of shiva's arrow has become the subordinate to even this *karuna*.

Vishvanatha, holds the distinct opinion about this verse of Amaruka by adding that that both *karuna and shringara* have acquired the subordinate position to the one major *bhvava* of the poetry viz. extraordinary valour of Lord Shiva as they are

helping in the development of the major *bhava* or inclination of the author in the poetry and that is the reason that the description of *karuna and shringara*, two contradictory *rasas* will not harm the poetry.

**अत्र कविगताभगवद्विषयारतिःप्रधानम् । तस्याःपरिपोषकतयाभगवतस्त्रिपुरध्वंसंप्रत्युत्साहस्यापरिपुष्टतयारसपदवीमप्राप्ततयाभावमात्रस्यकरुणोङ्गम् । तस्य च कामीवेति साम्यबलादायातःशृङ्गारः। एवं चाविश्रान्तिधामतयाकरुणस्याप्यङ्गतैवेतिद्वयोरपिकरुणशृङ्गारयोर्भगवदुत्साहपरिपुष्टतद्विषयरतिभावास्वादप्रकर्षकतयायौगपद्यसद्भावादङ्गत्वेननविरोधः ।**[7]p. 261.

So, according to Vishvanatha ,the introductory *shloka* of *Amarushtaka* viz.क्षिप्तोहस्तावलग्नः etc is mere an example of *bhava* and not any particular *rasa.*

Now we can note the view of Kuntaka, the author of *Vakroktijeevita*, regarding the second verse of *Amrushataka* क्षिप्तोहस्तावलग्नः etc.

Kuntaka in his work *Vakroktijeevita* quotes the *shloka* क्षिप्तोहस्तावलग्नः etc. in third chapter while refuting the views of his predecessors on *rasavad alamkara*. Kuntaka clearly believes that there cannot be an existence of *alamkara* like *rasvad,* because nothing is experienced there apart from the subject in description (वर्ण्यवस्तु) and even there is a lack of coordination between the words and their meaning.

**अलंकारोनरसवत्परस्याप्रतिभासनात् |**

**स्वरूपादतिरिक्तस्यशब्दार्थासङ्गतेरपि ||**[8]३. ११

Kuntaka refutes one by one all the three views on *rasvadalamkara* stated by Bhamaha, Dandi and Udbhat. While refuting the concept of Anandvardhana on *rasvad alamkar*, he takes Anandvardha's exampleक्षिप्तोहस्तावलग्नः etc. and proves his distinct view of nonexistence of r*asvad*in this example.

As we discussed earlier that Aananadvardhana is of opinion regarding the shloka under discussion क्षिप्तोहस्तावलग्नः etc. that "*Karunarasa* reflected in the verse (when wives of demons are crying and lamenting because of the lord Shiva's act of ***Tripuradahan****)* has become subordinate to the power of shiva which is the major inclination of poet. He also talks about the occurrence of *shringara rasa* in the same *shloka* by showing the correlation between the identical behaviour of fire and lover.

But Kuntaka strongly refutes the occurrence of *shringara* especially *Irshyavipralambha shringara* in the phrase"साश्रुनेत्रोत्पलाभिः"of the *shloka* and opines that *vipralambha shringara* is not at all experienced here as the poetry has the major subject of description is the valour of Lord Shiva which is again intensified by the occurrence of *karuna rasa* (in the expression of grief by the behaviour of demons' wives) expressed by the creative mind of the poet, Amaruka. So, the heroism of Shiva is only intended by the poet and that only is cherished by the connoisseurs of poetry.

**“अत्रसास्रनेत्रोत्पलादिशब्दगम्यवैक्लव्यस्यशाम्भवशराग्निदह्यमानासुरसुन्दरीणां, त्रिपुररिपुप्रभावख्यापनपरस्यप्रयोजकत्वेनकरुणोरसः अङ्गं, न तु पुनरीर्ष्याविप्रलम्भशृङ्गारः, तस्याननुभूयमानत्वात् | तदयमत्रपरमार्थः –कविप्रतिभापरिपोषितप्रकर्षगम्यमान—करुणरसोपबृंहित—सौन्दर्यधाराधिरुढोभगवत्प्रभावातिशयःकामपिसहृदयहृदयहारितांप्रतिपद्यते |”**[9] p.140

Kuntaka also notes that the influence of fire of Shiva’s arrow and the influence of lover are identical just by words i.e., just by the *shabda shlesha,* but there is no similarity between them, and these two subjects of comparison are altogether different by nature. No two diametrically opposite elements having contradictory attributes stay together. So, *shringara* and *karuna* cannot co-exist

**न च शब्दवाच्यत्वंनामसमानंकामिशराग्नितेजसोःसंभवतीतितावतैवतयोस्तथाविधविरुद्धधर्माध्यासादिविरुद्धस्वभावयोरैक्यंकथंचिदपिव्यवस्थापयितुंपार्यते, परमेश्वरप्रयत्नेनापिस्वभावस्यान्यथाकर्तुमशक्यत्वात् |**[10]

Kuntaka also forcefully refutes the view of Anandvardhana who believes that poetic blemish called introducing two

contradictory rasas at one place in the same piece of poetry will be eradicated if one is major and the other is subordinate rasa. Rather Kuntaka is of opinion that *Karuna rasa* is only the major *rasa* in the example क्षिप्तोहस्तावलग्नः etc. and there is no base of *shringara,* because connoisseurs don't feel resemblance between them. So, no *rasvad alamkara* exists here.

We must note here that Kuntaka, the critic of high standard, very boldly provides his distinct view on the shloka क्षिप्तोहस्तावलग्नः etc. where Anandvardhana considers the occurrence of *shringara rasakaruna rasa* and *rasvad alamkara* in the poem, he totally disagrees with him and proclaims that only *vira rasa* in the form of Shiva's extra ordinary power is intended by Amaruka.

Arjun Varmdeva, the commentator of *Amarushataka* also gives noteworthy inputs on the introductory shloka under study. His view should be taken into consideration.

Arjun varmdevin his commentary *Rasika Sanjivani*on *Amarushataka*, explains in detail how this shloka unfolds the poetic elements like *upma alamkara, shlesha alamkara, karuna rasa, shringara rasa, rasavadalamkara* as well as how it becomes an example of *virodha rasa parihar* with reference to other rhetoricians. We will not discuss all these poetic elements as we have discussed earlier all above said elements in the same paper.

What is striking about *mangalacharana* of *Amarushataka* in the eyes of Arjunvarmdeva is the poet's genius or his creativity to express more than two rasas or mixed rasas in one poem. The ability to compose in mixed rasas is actually

the true touch stone of a poet. The single shloka of Amaruka has the ability to give as much pleasure as we may get by reading the whole complete work. No other work apart from the *Amrushataka* is ascribed to the poet, yet the first two introductory stanzas of the work show his ability to create in mixed *rasas* and this can transform the whole poetic experience. And that is the reason Abhinavgupta has rightly observed – "A single verse of Amaruka is worth a hundred whole works."

**"संकीर्णरसोपनिबन्धस्तुनिकषोरसकवीनाम्| किंचामीषांश्लोकानांतावतीरसोपकरणसामग्रीयावतीप्रबन्धेषु भवति | अत एवोक्तंभरतटीकाकारैः – अमरुकवेरेकःश्लोकःप्रबन्धशतायते'इति||[11]**

This *shloka* of Amaruka is a seminal example of a variety of poetic elements infused together. This couplet of Amaruka has been in the spotlight and has created waves in the poetic world for its creative brilliance and stylistic robustness.

All great rhetoricians have widely quoted the same *Manglacharana shloka* as an excellent example of diverse stylistic features i.e. *vira rasa*, *shringara rasa*, *karuna rasa, upama alamkara, rupaka alamkara, rasvad alamkara*, combination of two *rasas* and even *virodhrasaparihar*.

His popularity among great rhetoricians proves his mastery over the art of poetic composition. This also establishes the supremacy of Amaruka as the poet of highest order with all requisite accomplishments of master crafts man of poetic world.

## References:

1. Pandya, yogini, Editor. “Amarushatakam. “Parshva Publication Ahmedabad, 2008.P. no. 93
2. T.C. Upraiti, Editor. “Kavyaprakashaof Mammataacharya with Adarsh Sanskrit commentary of Maheshvaracharya.” Vol: 2, Parimal publication delhi ,1985. P. no.408
3. *Ibid,*p.no. 411
4. *Ibid,* Adarsh, commentary of Maheshwar Bhattacharya p.no. 411
5. Aacharya,vishveshveshvar, Editor. “Dhvanyalok of Anandvardhana.”Gyannmandalpub. limited, 1962, Varanasip.85
6. Shaligram shastri, Editor.“Vishvanathkrutahsahityadarpana with vimalhindi commentary.” Motilal Banarasidas Mumbai,2016. p.260
7. *Ibid,* p.no. 261
8. Parekh, Nagindas, Edit & Translation. “Kuntaka No Kavyavichar.” Gujarat Sahitya Academy Gandhinagar, 1988 p.134.
9. *Ibid,* p.no. 140
10. *Ibid,* p.no. 141
11. Narayan, Ram Acharya, Editor. “Amarushataka with the commentary RasikSanjivanini by Arjun Varmdeva.” Nirnaya Sagar Press Mumbai,1954, p.no. 6

# शङ्करकृताऽद्वैतप्रस्थाने अध्यासतत्त्वविश्लेषणम्

मदनदेबशर्मा
शोधछात्रः, संस्कृतविभागः, रायगञ्जविश्वविद्यालयः
**तथा च**
डः स्वपनमालः
सहायकाध्यापकः, संस्कृतविभागः, रायगञ्जविश्वविद्यालयः

**शोधसारः**

भारतीयदर्शनसम्प्रदायेषु वेदान्तदर्शनस्य विशिष्टस्थानमस्ति। वेदान्तदर्शनं वेदस्य ज्ञानकाण्डस्योपरि रचितमस्ति। वेदान्तदर्शने परब्रह्मणः स्वरूपविषये बहुनि मतानि सन्ति। तेषु मतेष्वद्वैतमतं प्रधानप्रवर्तकस्य प्रचारकस्य शङ्कराचार्यस्य। शङ्करस्याऽद्वैतप्रस्थाने अध्यासतत्त्वस्य विशिष्टस्थानमस्ति। दर्शनेऽस्मिन् अध्यासतत्त्वस्य सम्यङ्निरूपणमस्ति। अध्यासो जीवानां ब्रह्मप्राप्तेर्बाधिकस्वरूपः। जीवात्मा अध्यासप्रभावेन परमेश्वरस्य स्वरूपं ज्ञातुं न शक्यते। परन्तु आत्मा नित्य-शुद्ध-बुद्ध-मुक्तस्वरूपः। अध्यासयुक्तं भवति चेदात्मा स्वस्वरूपं ज्ञातुं न शक्यते। अध्यासस्यापसारणं भवति भौतिकजगतः मुक्तिमार्गः। आत्मतत्त्वज्ञानेन अध्यासस्य नाशो भवति। अनेन जीवो ब्रह्मस्वभावं प्राप्नोति। आत्मज्ञानिनो ब्रह्मस्वरूपेऽवस्थानं कुर्वन्ति।

**मुख्यशब्दा**ः- दर्शनम्, वेदान्तः, अद्वैतम्, ब्रह्म, जीवः, माया, अध्यासः, मुक्तिः।

दृश्यते यथार्थतत्त्वमनेन इति दर्शनम्। येन शास्त्रेण यथार्थतत्त्वज्ञानं लभते तद् दर्शनशास्त्रम्। अपि च येन शास्त्रेण नियतपरिवर्तनशीलस्य जगत्प्रपञ्चस्य सत्योपलब्धिं भवति तद् दर्शनशास्त्रम्। भारतीयदर्शनशास्त्रस्य विभागद्वयमस्ति, तद्यथा अस्तिकनास्तिकश्चेति। पाणिनिसूत्रे भारतीयदर्शस्य विभागप्रसङ्गे कथितमस्ति – "अस्ति नास्तिदिष्टं मतिः" [1]। अत्रास्ति इत्युक्ते परलोकं अस्ति इति विषयं बोधयति। नास्ति इत्युक्ते परलोकं नास्ति इति बोधयति। पाणिनिमतानुसारेण आस्तिकदर्शनं परलोकस्यास्तित्वं स्वीकरोति, नास्तिकदर्शनं न स्वीकरोति। किन्तु अनेन मतानुसारेण

[1] अष्टाध्यायी- ४/४/६०

भारतीयदर्शनस्य विभाजनं न भवति। अस्य कारणं भवति, बौद्धदर्शनं परलोकस्यास्तित्वं स्वीकरोति, किन्तु नास्तिकदर्शनरूपेण परिचितमस्ति।

धर्मशास्त्रकारः मनुः तस्य मनुसंहितायां उक्तवान् – "नास्तिको वेदनिन्दकः" [2]। अस्यार्थो भवति, नास्तिकदर्शनं वेदस्य प्रामाण्यं न स्वीकरोति। अस्तिकदर्शनं वेदस्य प्रामाण्यं स्वीकरोति। नास्तिकशब्दस्येदमर्थमाधारीकृत्य भारतीयदर्शनसम्प्रदायस्य विभागो कृतोऽस्ति। नास्तिकदर्शने सम्प्रदायत्रयमस्ति। तद्यथा – चार्वाकदर्शनं बौद्धदर्शनं जैनदर्शनञ्च। अस्तिकदर्शने षट् सम्प्रदायाः सन्ति। तद्यथा – सांख्य-योग-न्याय-वैशेषिक-मीमासा-वेदान्तश्च।

वेदान्तदर्शनं भारतीयदर्शनसम्प्रदायस्य आस्तिकसम्प्रदायस्य अन्तर्गतमिति। दर्शनमिदं सर्वातिशायि दर्शनमस्ति। उपनिषद् तु वेदान्तस्य प्रमुखग्रन्थः। उपनिषद्-शब्दस्तु वेदान्तशब्देन अभिधीयते-"वेदान्तो नाम उपनिषत्प्रमाणम्" [3]। उपनिषद्-भगवद्गीता-ब्रह्मसूत्रञ्च वेदान्तदर्शनस्य भित्तिस्वरूपम्। तद् ग्रन्थत्रयमेकत्रमेव प्रस्थानत्रीरूपेण परिचितमस्ति। भगवता कृष्णद्वैपायनेन उपनिषदां परस्परबिरुद्धप्रतीयमानानां मतानां समाधानाय ब्रह्मसूत्राणि प्रणीतानि। अत्र ५५५ सूत्राणि सन्ति। ब्रह्मसूत्रे अध्यायचतुष्टयमस्ति। तद्यथा समन्वय-अविरोध-साधन-फलञ्च। अत्र सूत्राणि क्षुद्ररूपेण तिष्ठन्ति। अस्मात् कारणात् सूत्राणि द्व्यर्थकान्यस्पष्टार्थकानि च सन्ति। बहव आचार्याः सूत्राणां द्व्यर्थकमस्पष्टार्थकञ्च निरसनाय स्ववैदान्तिकमतवादानां सूचनां कृतवन्तः। तद्यथा- शङ्कराचार्यस्य केवलाद्वैतवादः रामानुजाचार्यस्य विशिष्टाद्वैतवादः निम्वार्काचार्यस्य द्वैताद्वैतवादः मध्याचार्यस्य द्वैतवादः वल्लभाचार्यस्य शुद्धाद्वैतवादः भास्कराचार्यस्य भेदाभेदवादः जीवगोस्वामीनः अचिन्त्यभेदाभेदवादश्च। एतेषु शङ्कराचार्यस्य केवलाद्वैतवादः प्रसिद्धमस्ति। तत्र भगवता शङ्कराचार्येण विरचितस्य शारीरकभाष्यस्य विशिष्टं स्थानमस्ति। अत्रैव वेदान्तदर्शनं सम्यक्-रूपेणालोचितमस्ति। शङ्कराचार्यस्याद्वैतमार्गमेव वेदान्ते स्वीकृतम्।

उपनिषदीयतत्त्वचिन्तात अद्वैतवादिचिन्तनस्य उत्पत्तिर्भवति। अद्वैतवेदान्ते केवलं ब्रह्मैव सद्वस्तु, जगन्मिथ्यास्वरूपम्। तत्र जीवात्मापरमात्मैक्यज्ञानं मुक्तिमार्गरूपेण च कल्पितमस्ति। तद्यथा आचार्यो वाचस्पतिमिश्रेणोक्तं – "बृहत्त्वाद् बृहणत्वाद् वा

---

[2] मनुसंहिता- २/११

[3] वेदान्तसारः, विपदभञ्जन पाल, पृ-१९

आत्मैव ब्रह्मेति गीयते"[4]। आत्मन अतिरिक्तं किमपि व्यापकं नास्ति, आत्मा एव ब्रह्मस्वरूपम्। शङ्कराचार्यस्य पूर्वे अद्वैतवादस्य अनेका आचार्या आसन्, किन्तु शङ्कराचार्योऽस्य मतवादस्य प्रमुखः प्रवर्तकः प्रचारकश्च। शङ्कराचार्योऽद्वैतवादस्य मूलतत्त्वं प्रतिपादनाय आह-

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
ब्रह्म सत्यं जगन्मिथ्या जीवः ब्रह्मैव नापरः॥[5]

शङ्करमते ब्रह्मसत्यं जगन्मिथ्येति। किन्तु यस्मिन् जगति जीवस्य जन्म-मृत्युश्च भवति, प्रत्यक्षयोग्यञ्च स्यात्, तर्हि कथं तद् जगत् मिथ्यारूपं भवति ?

शङ्करवेदान्ते मिथ्यायाः लक्षणद्वयमस्ति। बाधिततत्त्वं मिथ्यारूपं भवति इति प्रथमलक्षणम्।

तद्यथा स्वप्नाभिज्ञता जाग्रतवस्थायां बाधिता भवति। अतः स्वप्नाभिज्ञता मिथ्यास्वरूपा। रज्जौ

सर्पभ्रमे, रज्जुज्ञानं भवति चेत् सर्पज्ञानं बाधितं भवति। अतः सर्पज्ञानमपि मिथ्यास्वरूपम्। अबाधितं सर्वदानुवर्तमानं तत्त्वं सत्यं भवति। ब्रह्म सर्वावस्थायां अनुवर्तमानं तिष्टति। अतः परमार्थे ब्रह्मैव सत्यं जगन्मिथ्यास्वरूपम्। मिथ्यायाः द्वितीयं लक्षणं भवति सदसद्विलक्षणं अनिर्वचनीयं वा तत्त्वं मिथ्यास्वरूपम्। विलक्षणशब्दस्यार्थः भिन्नः। यत् परमार्थे सन्नास्ति असदपि नास्ति तन्मिथ्यास्वरूपम्। जगत् ब्रह्मसादृश्यं सन्नास्ति, गगनारविन्दवत् असदपि नास्ति। अतः परमार्थे जगन्मिथ्यास्वरूपम्।

शाङ्करदर्शने जीवस्य त्रयाणां स्तराणां उल्लिखितमस्ति। प्रथमे स्तरे जीवानां समीपे जगत् सत्यरूपेण प्रतिभाति यदा ब्रह्मचेतना न भवति। द्वितीये स्तरे जगतः कारणरूपेण ईश्वरस्य कल्पना भवति। अस्मिन् स्तरे जगत् तस्य कारणमीश्वरश्च सद्रूपेण प्रतिभाति। तृतीये स्तरे ब्रह्मज्ञानस्योदयं भवति चेत् जगत् ईश्वरश्च मिथ्यारूपेण प्रतिभाति। शङ्कराचार्यस्य अद्वैतवादस्य सारो भवति – परमार्थिकदृष्टितः ब्रह्म निर्गुणं भवति, अज्ञानस्य प्रभावेन निर्गुणब्रह्मणः सगुणेश्वररूपेण प्रतिभातं भवति।

अद्वैतवेदान्तस्योपरि सिद्धिग्रन्थचतुष्टयं रचितमस्ति। तद्यथा – मण्डनमिश्रस्य ब्रह्मसिद्धिः सुरेश्वराचार्यस्य नैष्कर्म्यसिद्धिः विमुक्तानन्दस्य इष्टसिद्धिः

---

[4] द्रष्टव्यम्, भारतीय दर्शनेर रूपरेखा, अमित भट्टाचार्य, पृ - १८३

[5] द्रष्टव्यम्, भारतीय दर्शन, समरेन्द्र भट्टाचार्य, पृ - ३३२

मधुसूदनसरस्वत्याः अद्वैतसिद्धिश्च। अपि च अद्वैतवेदान्ते बहवः व्याख्यानग्रन्थाः सन्ति। तद्यथा – अष्टावक्रसंहिता तत्त्वबोधः आत्मबोधः वाक्यवृत्तिः भामतीटीका लघुवाक्यवृत्तिः पञ्चीकरणं वेदान्तपरिभाषा पञ्चदशी कौपिनपञ्चकं साधनपञ्चकं दशश्लोकी चेति। अधुनापि मनीषिणः अद्वैतवेदान्तस्योपरि
बहवः ग्रन्थाः लिखितवन्तः। स्वामीविवेकानन्दस्य ग्रन्थाः प्राच्ये अद्वैतवेदान्तस्य तत्त्वप्रसाराय साहाय्यं कुर्वन्ति।

निर्णयं भवति संशयसापेक्षम्। संशयं न भवति चेत् निर्णयेच्छा कदापि न भवेत्। यदा जीवाः चिन्तयन्ति कोऽहम्? मम किं स्वरूपम्? तदा संशयोत्पत्तिर्भवति, अहं बुद्धिस्वरूपं मनःस्वरूपं वा? शङ्कराचार्योऽस्यानादिसिद्धस्य व्यवहारज्ञानस्य मूलतत्त्वं निर्णयमकरोत्। अनन्तरं युक्तिपथावलम्बनेन ब्रह्मसूत्रस्य व्याख्यां कृता। ब्रह्मसूत्रस्य प्रथमांशो भाष्यभूमिकास्वरूपः। एषा भाष्यभूमिका अध्यासभाष्यरूपेण परिचितास्ति। सम्प्रति प्रश्नो भवति, किमध्यासः? अस्य स्वरूपं किम्?

अध्यासस्य लक्षणप्रसङ्गे शङ्कराचार्य आह – "स्मृतिरूपः परत्र पूर्वदृष्टावभासः"[6]। अत्र स्मृधातोरुत्तरं कर्मवाच्ये क्तिन् प्रत्ययेन स्मृतिशब्दोत्पत्तिर्भवति। स्मृतिशब्दस्यार्थः स्मार्यवस्तु। वस्तुनि स्मार्यवस्तुसदृशं रूपं भवति स्मृतिरूपम्। परत्र शब्दस्यार्थोऽन्येऽधिकरणे। पूर्वदर्शनादवभासः पूर्वदृष्टावभासः। लक्षणस्यार्थः भवति, अन्येष्वधिकरणेषु (रज्जुप्रभृतौ) पूर्वदर्शनसंस्कारात् स्मार्यवस्तूनि (सर्पादौ) अवभासः अध्यासः। अस्य स्थुलार्थ एकस्मिन् वस्तुनि अन्यवस्त्वारोपो भवत्यध्यासः।

अध्यासस्य समानार्थकाः शब्दा आरोप अध्यारोपो भ्रमश्च। अध्यारोपस्य लक्षणप्रसङ्गे योगीन्द्रसदानन्दः तस्य "वेदान्तसारः" इति प्रकरणग्रन्थे उक्तवान्– "असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुन्यवस्त्वारोप अध्यारोपः" [7]। अत्र ब्रह्म एव सद्वस्तुः, जगत्प्रपञ्चम् अवस्तु एव। तद्यथा वेदान्तसारे उक्तमस्ति- "वस्तु सच्चिदानन्दमद्वयं ब्रह्म, अज्ञानादिसकलजडसमूहोऽवस्तु " [8] । सत्-चित्-आनन्दस्वरूपं अद्वयं ब्रह्म एव वस्तु। सत्-चित्-आनन्दमद्वयं इत्युक्ते, ज्ञानानन्दस्वरूपं नित्यसत्तायुक्तं च न द्वयं निर्गुणब्रह्मं बोधयति। सम्प्रति प्रश्नो भवति अज्ञानं किम्? अस्योत्तरे योगीन्द्रसदानन्दः आह – " आज्ञानं तु सदसद्भ्यामनिर्चनीयं त्रिगुणात्मकं

---

[6] वेदान्तदर्शनम्, दुर्गाचरण सांख्यवेदान्ततीर्थ, पृ - ७

[7] वेदान्तसार, लोकनाथ चक्रवर्ती, पृ - ९०

[8] वेदान्तसारः, विपदभञ्जन पाल, पृ - ७६

ज्ञानविरोधि भावरूपं यत् किञ्चित् इति वदन्ति "[9]। सदानन्दोऽज्ञानस्य पञ्चविशेषणं प्रयुक्तवान्। तद् यथा –

**अनिर्वचनीयम्**- अज्ञानं सद्रूपेण असद्रूपेण सदसद्रूपेण च निर्वचनस्य योग्यं न भवति। अज्ञानम् अस्ति, इदं वक्तुं न शक्यते, मुक्तावस्थायमज्ञानस्य अभावो दृश्यते। अज्ञानं नास्ति इदमपि वक्तुं न शक्यते, यावत् संसारस्य प्रतीतिर्भवति तावदज्ञानमपि प्रतिभाति। अज्ञानं सदसदपि नास्ति। अस्य कारणं भवति सदसच्च परस्परं विरूद्धधर्मविशिष्टम्। एकस्मिन् अधिकरणे परस्परविरूद्धधर्मविशिष्टपदाथद्वयं न तिष्ठति। अतोऽज्ञानं सदसद्विलक्षणमनिर्वचनीयम्।

**त्रिगुणात्मकम्**- सांख्यदर्शनस्य त्रिगुणात्मिकाप्रकृतिरेव वेदान्तदर्शने अविद्यास्वरूपिणी। इयमविद्या जाड्यधर्मात्मिका सक्रिया परिणामिनी च। उपनिषदि मायामविद्यां वा त्रिगुणात्मिका प्रकृति इति कथिताऽस्ति- "मायां तु प्रकृतिं विद्यात्" [10]। सांख्यदर्शने यथैव पुरुषसहायेन प्रकृतितः जगतः उत्पत्तिर्भवति तथैव वेदान्ते ब्रह्मसहायेनाविद्यातः जगतः उत्पत्तिर्भवति। किन्तु अविद्यायाः मायाया वा स्वतन्त्रसत्ता नास्ति। अविद्या ब्रह्मणः शक्तिविशेषा। तद्यथा वेदान्तपरिभाषां मङ्गलाचरणे धर्मराजाध्वरीन्द्र आह-

यदविद्याविलासेन भूतभौतिकसृष्टयः।
तं नौमि परमात्मानं सच्चिदानन्दविग्रहम्।।[11]

यस्य मायाविलासेन पञ्चभूतस्य भौतिकजगतश्च उत्पत्तिर्भवति तं सच्चिदानन्दरूपं परमात्मानं नमामि।

**ज्ञानविरोधि**- अज्ञानस्य प्रभावेन बद्धजीवस्य समीपे जगत् सत्यरूपेण प्रतिफलितं भवति। बद्धजीवस्य समीपे अज्ञानं ज्ञानविरोधि। अज्ञानं ब्रह्मणः स्वरूपमावृतं करोति। ब्रह्मज्ञानेन अविद्यायाः नाशो भवति। अतोऽज्ञानं ज्ञानविरोधि।

**भावरूपम्**- अज्ञानस्य शक्तिद्वयमस्ति। तद्यथा– आवरणं विक्षेपञ्च। आवरणशक्तिर्भवत्यभावात्मिका, विक्षेपशक्तिर्भावात्मिका। अभावात्मकाज्ञानं ब्रह्मणः स्वरूपमावृणोति। भावात्मके ब्रह्मस्थले मिथ्याजगत आरोपो भवति। आवरणे अज्ञानं ज्ञानाभावरूपं भवति। विक्षेपे मिथ्याज्ञानस्वरूपं भवति। वेदान्ते अज्ञानमित्युक्ते

---

[9] वेदान्तसारः, विपदभञ्जन पाल, पृ - ७९

[10] श्वेताश्वतरोपनिषद् – ४/१०

[11] वेदान्तपरिभाषा, करुणासिन्धु दास, पृ - १

ज्ञानस्याभावं न बोधयति। वैदान्तिकाः वदन्ति ज्ञानेन अज्ञानस्य निवृत्तिर्भवति। अज्ञानं ज्ञानाभावरूपं भवति चेत् तस्य निवृत्तिः कदापि न भवेत्। अज्ञानं भावरूपं भवति चेत् तस्य निवृत्तिर्भवेत्।

**यत्किञ्चिद्**- जगत्प्रपञ्चस्य पारमार्थिकसत्ता नास्ति। केवलं व्यवहारिकसत्ता अस्ति। उपनिषदि अज्ञानम् अघटन-घटन-पटीयसीशक्ति इति कथितमस्ति। एषा शक्तेः मिथ्याजगत उत्पत्तिर्भवति। मिथ्या अलीकतः पार्थक्यं भवति। अलीकम् इत्युक्ते किमपि नास्ति किन्तु अज्ञानं यत्किञ्चिद् स्वरूपम्।

शङ्करमते जगतो व्यवहारसत्तायाः मूलं भवतीदमज्ञानम्। यावदज्ञानं तिष्ठति तावज्जीवस्य समीपे जगत् सत्यरूपेण प्रतिभाति। ब्रह्मज्ञानस्योदयं भवति चेत् जगन्मिथ्यारूपेण प्रतिभाति। एवमेव नित्यशुद्ध–बुद्ध–ब्रह्मतत्त्वे नानारूपात्मकस्यानित्यजगत आरोप अध्यारोप इत्युच्यते।

अध्यासस्य स्वरूपविषये दार्शनिकसम्प्रदायेष्वनेकानि मतानि सन्ति। एकस्मिन् वस्तुनि अन्यवस्तुनामारोपो भवति अध्यासः। अत्र पारमार्थिकरूपेण वस्तु न तिष्ठति, केवलं वस्तुनः प्रतीतिर्भवति। अयमारोपः ख्यातिरित्युच्यते। ख्यातिशब्दस्यार्थः भवति ज्ञानं, किन्तु अत्र अवभासार्थे प्रयुक्तमस्ति। शङ्कराचार्योऽध्यासस्य लक्षणवर्णनादनन्तरं दार्शनिकसम्प्रदायानां मतानामालोचनं कृतवान्। प्राचीनमतानुसारेण ख्यातिवादस्य पञ्चसम्प्रदायाः सन्ति। तद्यथा- आत्मख्यातिवाद-असत्ख्यातिवाद-अख्यातिवाद-अन्यथाख्यातिवाद-अनिर्वचनीयख्यातिवादश्च। दार्शनिकसम्प्रदायेष्वधिष्ठानस्यारोपस्य च स्वरूपविषये बहवो मतानि सन्ति, किन्तु अध्यासं भ्रमं वा सर्वे सम्प्रदायाः स्वीकुर्वन्ति।

अध्यासस्य बहवो भेदाः सन्ति। तद्यथा – अर्थाध्यासो ज्ञानाध्यासश्चेति। रज्जौ सर्परूपम्ध्यासो भवति अर्थाध्यासः। रज्जौ सर्पज्ञानं भवति ज्ञानाध्यासः। अपि च अर्थाध्यासः द्विविधं भवति, धर्मीयोऽध्यासः धर्माध्यासश्चेति। एकस्मिन् धर्मिणि अन्यधर्माध्यासो भवति धर्माध्यासः। तद्यथा- अहं शरीरः। अत्र अहं शरीरस्य धर्मीस्वरूपम्।

अपि तु सोपाधिकः निरूपाधिकश्च भेदेन अध्यासो द्विविधं भवति। लोहितस्फटिकः सोपाधिकोऽध्यासस्य दृष्टान्तस्वरूपम्। अस्य लक्षणप्रसङ्गे शङ्कराचार्य उक्तवान् – "स्वभावान्यथाकल्पकास्त उपाधयः सत्त्येव स्फटिकादौ रक्तत्वकल्पना

जपाकुसुमादयः” [12]। स्फटिकस्य सन्निहितं जपाकुसुममत्र उपाधिस्वरूपम्। भ्रमहेतुः उपाधेः लोहितधर्मः स्फटिके प्रतिभाति। द्विचन्द्रः पीतशङ्खश्च सोपाधिकोऽध्यासस्य उदाहरणम्। अस्य विशेषत्वमिदमस्ति यत्, यथार्थः ज्ञानोत्पत्तिर्भवति किन्तु भ्रमनिरसनं न भवति। उपाधिनिरपेक्षं भ्रमं भवति निरूपाधिकोऽध्यासः। तद्यथा- आत्मनि अन्तःकरणं तद्धर्मस्य च अध्यासो भवति निरूपाधिकोऽध्यासः। पुनः सादिः अनादिश्च भेदेन अध्यासो द्विविधः। ब्रह्मणि जगत्प्रपञ्चस्य आत्मानि अनात्मायाः च अध्यासो भवति अनाद्यध्यासः। शुक्तौ रजतस्य अध्यासो भवति साद्यध्यासः। भ्रमनाशं भवति चेत् अध्यासोत्पत्तिर्भवति। भ्रमज्ञानस्यानुसन्धाने अयं प्रतीतं भवति यत्, अस्याधारो सत्यम्। आधारे अस्मिन् यत्प्रतीतं भवति तन्मिथ्यास्वरूपम्। अत्र मिथ्या इत्युक्ते अलीकं नास्ति। मिथ्या अलीकतः पृथक् भवति। अलीकं इत्युक्ते किमपि नास्ति किन्तु मिथ्या कथञ्चित्स्वरूपा। अतोऽध्यासोऽनिर्वचनीयः। यत्र यदध्यासो भवति, तत्र तस्य दोषो गुणश्च न तिष्ठति। यदा रज्जौ सर्पाध्यासो भवति, तदा तत्र सर्पस्य किमपि दोषो गुणश्च न तिष्टति। तथैव आत्मन्यनात्मन अनात्मनि आत्मनो वा अध्यासो भवति चेत्, तत्र किमपि दोषो गुणश्च न दृश्यते।

प्रमाणव्यवहारः प्रमेयव्यवहार अहं-ममादिव्यवहारः लौकिक-वैदिकव्यवहारश्च सर्वे अविद्याया आत्मानात्मनोः परस्परमध्यासादुत्पन्नं भवन्ति। सम्प्रति प्रश्नो भवति, प्रत्यक्षादिप्रमाणानि वेदादिशास्त्राणि च केन प्रकारेणाध्यासस्वरूपाणि भवन्ति?

अस्योत्तरे शङ्कराचार्यः आह– “देहेन्द्रियाष्वहं ममाभिमानहीतस्य प्रमृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः”[13]। देहादिविषयेऽभिमानवर्जितं भवति चेत्, अहंममादिज्ञानपूर्वकं कर्त्तृत्वाभिनिवेशो न भवेत्। इन्द्रियाण्यपि निर्व्यापारवत् तिष्ठन्ति। अस्यामवस्थायामात्मनि कर्तृत्व-भोक्तृत्वादि ज्ञानं न भवति। परमात्मानं विहाय प्रमाणानां वेदादिशास्त्राणाञ्च प्रवृत्तिं न भवति। तदेदं प्रतिपन्नं भवति यत्, प्रत्यक्षादिप्रमाणानि वेदादिशास्त्रानि च अध्यासमूलकानि। शास्त्राणां केवलं व्यवहारप्रामाण्यं अस्ति, परमसत्त्वा नास्ति। तद्यथा शङ्कराचार्यः विवेकचूडामणौ आह -

न योगेन न सांख्येन कर्म्मणा नो न विद्यया।

[12] द्रष्टव्यम्, वेदान्तसारः, विपदभञ्जन पाल, पृ - २८१

[13] वेदान्तदर्शनम्, दुर्गाचरण सांख्यवेदान्ततीर्थ, पृ - २०

ब्रह्मात्मैकत्वबोधेन मोक्षः सिध्यति नान्यथा।।[14]

योग-सांख्य-कर्म-शास्त्रज्ञानेन च मोक्षप्राप्तिर्न भवति। जीवस्य ब्रह्मणश्चात्मैकत्वबोधेन मोक्षप्राप्तिर्भवति।

अपि च ईशोपनिषदि उक्तमस्ति –

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय एव ते तमो य उ विद्यायां रताः।।[15]

ये भोगासक्तजना अविद्यायुक्तानि कर्मानुष्ठानानि कुर्वन्ति, ते कर्मफलस्वरूपम् अज्ञानान्धकारे प्रवेशं कुर्वन्ति। अन्ये ये जनाः ज्ञानार्जनस्य प्राथमिकोपायः विवेकवैराग्यादिसाधनानि न आचरन्ति, केवलं शास्त्रपठने श्रवणे देवताज्ञाने च रताः तिष्ठन्ति, ज्ञानस्य मिथ्याभिमानं कुर्वन्ति, ते ततोधिको गहनान्धकारे प्रवेशं कुर्वन्ति।

अपि च कठोपनिषदि विद्यया मोहितस्याज्ञानीपुरुषस्यान्धानुकरणस्य चर्चा अस्ति। एष अज्ञानीपुरुष अविद्याप्रभावेन आत्मनं पण्डिता इति अनुभवति। यस्य परिणति अन्धपुरुषेण निर्देशितं मार्गसादृश्यमिव भवति। अनेन सत्यदर्शनं न भवति। यथा कठोपनिषदि उक्तमस्ति-

अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितमन्यमाना ।
दन्द्रम्यमाणा परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ।।[16]

अविद्यया आच्छन्नजना अहं ज्ञानी इति अनुभवन्ति। मिथ्याजगतो भ्रमजालेन आबद्धं भवन्ति। जन्म-मृत्युचक्रे च पुनरावर्तन्ते। यथान्धजनाः स्वलक्ष्ये गन्तुं न पारयन्ति।

न केवलं अज्ञजना अपि तु ज्ञानिनोऽपि अध्यासतत्त्वप्रभावेनात्यावश्यकं कार्याणि कुर्वन्ति। व्यवहारकाले ज्ञानिनः पशुनामिव आचरन्ति। कर्णेन्द्रियेन सह शब्दसाक्षात्कारे पशूनां शब्दबोधोत्पत्तिर्भवति। शब्दानुकूले तद्विषये प्रवृत्तं भवति, प्रतिकुले निवृत्तं भवति। तद्यथा शङ्कराचार्य आह- "दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य मां हन्तुमयमिच्छतीति पलायितुमारभ्यन्ते, हरिततृणपूर्णपाणिमुपलभ्य त्वं प्रत्यभिमूखी भवन्ति एवं पुरुषा अपि व्युत्पन्नचित्ता क्रूरदृष्टीनाक्रोशतः खडेगाद्योत-करान् वलवत उपलभ्य ततो निवर्त्तन्ते, तद्विपरीतान्

[14] विवेकचूडामणिः – ५८

[15] ईशोपनिषद् -१२

[16] कठोपनिषद् – १/२/५

प्रति अभिमुखी भवन्ति"[17]। अतो ज्ञानिनः पशूनामिव आचरन्ति। शास्त्रव्यवहारे तु यद्यपि ज्ञानिनामधिकारः सन्ति। यावदात्मज्ञानं न भवन्ति, तावत् जनाः शास्त्रकर्मानुष्ठाने प्रवृत्तं तिष्ठन्ति। शास्त्राणि केवलं तत्त्वज्ञाने चित्तशुद्धेः साहाय्यं कुर्वन्ति। अनन्तरं तानि निस्फलानि भवन्ति। तद्यथा विवेकचूडामणौ कथितमस्ति –

चित्त्यस्य शुद्धये कर्म्म न तु वस्तूपलब्धये।
वस्त्वसिद्धिर्व्विचारेण न किञ्चित् कर्म्मकोटभिः।।[18]

शास्त्रकर्मानुष्ठानं चित्तशुद्धेः कारणमात्रम्। शास्त्रकर्मानुष्ठानेन ब्रह्मोपलब्धिः न भवति। आत्मनि वस्तुतत्त्वविचारेण ब्रह्मोपलब्धिर्भवति, कर्मानुष्ठानेन न भवति।

आत्मनि बुद्ध्याद्यनात्मानां, बुद्ध्याद्यनात्मासु अहं-ममादि ज्ञानानां परस्पराध्यासो भवति। अध्यासं विहाय किमपि व्यवहारोत्पत्तिर्न भवति। तद्यथा– "पुत्रभार्य्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वेति वाह्यधर्म्मानात्मन्यध्यस्यति, तथा देहधर्म्मान् स्थूलोऽहं, कृशोऽहं, गौरोऽहं तिष्ठामि गच्छामि चेति"[19]। अयमनादिरनन्तमिथ्याप्रत्ययरूपोऽध्यास एव कर्त्तृत्व-भोक्तृत्वप्रवर्तकः।

अनर्थकस्य मूलं भवत्यध्यासः। अध्यासं निराकरणाय आत्मतत्त्वविचारस्य प्रयोजनम् अस्ति। आत्मज्ञानमेव मुक्ते उपायस्वरूपम्। आत्मज्ञानं विहाय न्यान्यः पन्था विद्यते। प्रथमावस्थायां आत्मज्ञानलाभार्थं नित्यनैमित्तिककर्मानुष्ठानेन चित्तशुद्धेः प्रयोजनमस्ति। चित्तशुद्धेरनन्तरं साधनचतुष्टयस्य प्रयोजनमस्ति। अनन्तरं श्रवण–मनन–निदिध्यासनस्य च प्रयोजनमस्ति। मुमुक्षुजनाः श्रद्धया सह तत्त्वदर्शिनः गुरोः निकटे आत्मतत्त्वं श्रवणं करिष्यन्ति। तदनन्तरं ब्रह्मतत्त्वस्य आत्मतत्त्वस्य वा विचारपूर्वकं तात्पर्यनिर्णयं करिष्यति। अस्य नाम मननम्। मननस्यानन्तरं चित्ते ब्रह्मतत्त्वं धारणेन ब्रह्मसाक्षातकारो भविष्यति। अस्य नाम निदिध्यासनम्। निदिध्यासनेन ब्रह्मसाक्षकारो भवति तन्मुक्तिः कथ्यते। आत्मोपलब्धिर्भवति चेत् जनाः सच्चिदानन्दब्रह्मरूपेणावस्थानं कुर्वन्ति।

## ग्रन्थपञ्जी

**मुख्यग्रन्थाः-**

---

[17] वेदान्तदर्शनम्, दुर्गाचरण सांख्यवेदान्ततीर्थ, पृ - २३

[18] विवेकचूडामनिः - ११

[19] वेदान्तदर्शनम्, दुर्गाचरण सांख्यवेदान्ततीर्थ, पृ - २७

अष्टाध्यायी, नरेश झा (सम्पादकः), चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१९

उपनिषद् ग्रन्थावली, स्वामी गम्भीरानन्द (सम्पादकः), उद्बोधन कार्यालय, कलकाता, २०१९

कठोपनिषद्, स्वामी जुष्टानन्द (सम्पादकः), उद्बोधन कार्यालय, कलकाता, १९९७

मनुसंहिता, गुरुचरण दास (सम्पादकः), संस्कृत पुस्तक भाण्डार, कलकाता, १४१८वङ्गाब्दः

विवेकचूडामणिः, उपेन्द्रनाथमुखोपाध्याय (सम्पादकः), बङ्गीय साहित्य परिषद ग्रन्थागार, कलकाता, १३०४ वङ्गाब्दः

वेदान्तदर्शनम्, दुर्गाचरणसांख्यवेदान्ततीर्थः(सम्पादकः), देव साहित्य कुटीर प्रा. लि., कलिकाता, २०१६

वेदान्तपरिभाषा, करुणासिन्धु दास(सम्पादकः), संस्कृत पुस्तक भाण्डार, कलकाता, २००४

वेदान्तसारः, विपदभञ्जन पाल (सम्पादकः), संस्कृत पुस्तक भाण्डार, कलकाता, २०१६

वेदान्तसारः, लोकनाथ चक्रवर्ती (सम्पादकः), पश्चिमवङ्ग राज्य पुस्तक पर्षद, कलकाता, २०१४

**गौणग्रन्थाः**

भट्टाचार्य, समरेन्द्र, भारतीय दर्शन, वुक सिण्डिकेट प्राइभेट लिमिटेड, कलकाता, २०१३

भट्टाचार्य, अमित, भारतीय दर्शनेर रूपरेखा, संस्कृत वुक डिपो, कलकाता, २०१३

# कविक्षेमधारिसिंहविरचितसुरथचरितमहाकाव्यस्य विषयसारविमर्शः

जगदीशमालः
एम.फिल्
संस्कृतविभागः
रायगञ्जविश्वविद्यालयः
उत्तरदिनाजपुरम्
Email id- jagadishmal.snsk@gmail.com

**भूमिका-** अर्वाचीनसंस्कृतसाहित्यजगतः पारंगत-वेदान्तविनोद-क्षेमधारिसिंहमहोदयः प्रख्यातः काव्यकारोऽस्ति। श्रीमतां पुरस्ताद् उपस्थापयन्निदमभिनवं 'सुरथचरितम्' इति महाकाव्यमुत्तमरूपेण विद्यते। नाविदितम् इदं यद् उपासनाप्रसादादधिभारतं मिथिलाञ्चलेषु सहस्रशः सिद्धाः पुरुषा गीर्वाणवाणीवरभाजनानि। मिथिलाराज्योपार्जकस्य महामहोपाध्यायमहेशठक्कुरस्य कुलमित्थमेव चिराद् विश्रुतम्। कुलस्यास्य कतिपयशास्त्रतत्त्वज्ञाः महापुरुषाः स्वाक्षययोगदानैः संस्कृतवाङ्मयं समक्तया समृद्धं कृतवन्तः। सुरथचरितमहाकाव्यस्यास्य प्रणेता तत्र 'श्रीकरसाहेवा' परमनामधेयो दिवंगतः पण्डितः क्षेमधारिसिंहः।

कविक्षेमधारिसिंहविरचितमिदं सुरथचरितमहाकाव्यमर्वाचीनसंस्कृतसाहित्यजगत्यभिनवत्वरूपेण वर्तते। यद्यपि अर्वाचीनसंस्कृतसाहित्यमवलम्ब्य सम्प्रति प्रायेण सर्वत्रैव शोधकार्यं प्रचलति तथापि अनेन क्षेमधारिसिंहमहोदयेन विरचितं सुरथचरितमहाकाव्यमाधारीकृत्य शोधकार्यं प्रायेण न प्रचलतीति शोधकार्यस्येतिहासे सुरथचरितमहाकाव्यस्यानुल्लिखितत्वात्। तस्मादिदमभिनवं महाकाव्यमाधृत्य शोधकार्यस्य प्रयोजनमस्तीति मन्यते।

प्रकृततयाऽस्मिन् शोधकार्ये वर्णनात्मकशोधप्रविधिः ग्रहणीयो भवति। यस्मात् शोधकार्यमिदं मूलतया सुरथचरितमहाकाव्याख्यं मूलग्रन्थमाश्रित्य समारम्भं भवति। तदपि च विश्लेषणात्मकशोधपद्धत्या मूलग्रन्थेन साकं काव्यशास्त्रीयग्रन्थानामालोचनं भवति। काव्यशास्त्रीयालोचनाकाले तुलनात्मकपद्धत्या सुरथचरितमहाकाव्येन समं काव्यशास्त्रीयतत्त्वानां सादृश्यं वैसादृश्यञ्च दर्शितं भवति। सुरथचरितमहाकाव्यस्य

पर्यावरणभावाविचारकाले ऐतिहासिकपद्धत्याऽपि पर्यावरणविधेः विश्लेषणं भवति। परन्तु अत्र शैधकार्ये वर्णनात्मकशोधप्रविधिः प्रधानशोधप्रविधिरूपेण ग्रहणं भवति। शोधकार्यस्य मूलप्रबन्धप्रस्तुतकाले उद्धृतीनां पादटीकया पादटिप्पण्या च प्रदर्शितं भवति। शोधप्रबन्धस्यान्ते ग्रन्धपञ्जीप्रस्तुतकाले एम-एल-ए २००८ इति पद्धत्या प्राथमिक-गौणभेदाभ्यां ग्रन्थानां पञ्जीकरणं भवति।

कवेः संस्कृतेन निम्नलिखिताः दार्शनिकभावसंवलिताः पद्यात्मकरचनाः विद्यन्ते।

श्रीस्तुतिमाला- भारतीयदर्शनस्य प्रतिशाखाप्रतिपादिता शक्तिस्तुतिः। शतनामपञ्चिका- भवानी-काली-तारा-विष्णु-सूर्याणां शतनामस्तुतयः। सुरथचरितम्- महाकाव्यम्।

कालीककारादिसहस्रनामस्तोत्रम्– शिखरिणीवृत्त्या, कलिककारादिसहस्रनामस्तोत्रम् (अपरम्), शिखरिणीवृत्त्या, तारातकारादिसहस्रनामस्तोत्रम्- शिखरिणीवृत्त्या, सूर्यसहस्रनामस्तोत्रम्, श्रीशिवस्तुतिमाला, शान्तिमाला, चिन्मालास्तोत्रम्, अर्चनाख्याति इत्यादिना। एतद्भिन्नं पण्डितक्षेमधारिसिंहस्याध्यात्मिककृतयः भवन्ति- आङ्गलभाषानुदिता दुर्गासप्तशती, शान्तिमाला- दिव्यप्रकरणम्, चिन्मालास्तोत्रम्, सुरथचरितं महाकाव्यञ्च।

महाकाव्यमिदं महाशक्तेर्नमस्क्रियाभिः समारब्धम्। प्रथमे देवीमाहात्म्यवर्णनं ततः कविवंशपरिचयस्ततः कवेर्विनयोक्तयस्ततश्च मुख्या कथा। सा चेत्थम्- कस्यचित् कोलापुरनगर्यां द्वितीयस्य मनोः स्वारोचिषस्य कुले चैत्रकुलप्रदीपः कश्चित् सुरथो नाम राजा बभुव। स च सर्वथा धीरोदात्तादिगुणमण्डितः स्वमहिष्या मनोरमया सह सुखमयं जीवनं यापयति स्म। दुर्दैववशात् कदाचिच्छकत्त्युपासनालब्धपराक्रमेण केनापि बलिनाम्ना शत्रुणा पराक्रान्तः सन् स परमं दैन्यमवाप। राजलक्ष्म्या विरहितः स गृहलक्ष्म्याऽपि उपेक्षितो बभुव। सत्येवं स निर्वेदाद् वनं गत्वा आश्रयं नीतवान्। संयोगवशात् तस्मिन्नेव समये तस्मिन्नेव च नगरे कश्चित् समाधिनाम्ना वैश्याऽपि वसति स्म। सोऽपि पुत्रादिभिः परिक्लिश्यमानो सन् वनमागतवान्। वनेषु पर्यटतोस्तयोः सहसा समागमौ जातौ। तावुद्विग्नौ मनसी शान्त्यर्थं मुनेः मेधसः शरणं गतौ। मुनिश्च मायायाः माहात्म्यमुपवर्णयन् तामराधयितुं तावद् उपदिदेश। उपासनया जगदम्बायाः सुरथः स्वराज्यं लेभे वैश्यः समाधिश्च जीवन्मुक्तपदवीम्।

सुरथचरितमहाकाव्येऽस्मिन् ग्रन्थकारेण महाकाव्यानुसारं सामग्रिकवृत्तान्तं विशदीकृतवान्। परन्तु काव्यमिदं महाकाव्यं नवेति चर्चायाः प्रयोजनमस्ति

शोधकार्येऽस्मिन्। यथा साहित्यदर्पणकारविश्वनाथदिशा महाकाव्यलक्षणानुसारं सुरथचरितमहाकाव्यस्य महाकाव्यत्वं विचार्यते। लक्षणं हि महाकाव्यस्य इत्थं सूत्रितं विश्वानाथेन-

"सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।"[1]

एतस्मिन् महाकाव्ये रसवत् पद्यकदम्बविन्यासरूपः सर्गबन्धः सर्वत्र दृश्यते एव। चैत्रवंशीयः क्षत्रियो धीरोदात्तः सुरथो नाम राजा नायकः। अपि च-

"एकवंशभवा भूपा कुलजा बहवोऽपि वा।
श्रृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते।।
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।।"[2]

अत्र दृश्यते भक्तिपृष्ठभूमावलम्बितत्वात् समाधेः जीवन्मुक्तिवर्णनायाञ्चात्राङ्गीरसः शान्तः। किन्तु वर्णनवैषम्यक्रमेण श्रृङ्गारस्यापि प्राशस्त्यमस्त्येव। अङ्गरुपेण यथास्थलं हास्य-करुण-रौद्र-वीर-भयानक-बीभत्साद्भुतरसा अपि वर्णिताः। मुख-प्रतिमुख-गर्भ-विमर्श-निर्वहणाख्याः पञ्चापि नाट्यसन्धयो यथावसरं निवेशिता एव। लक्षणसूत्रघटके इतिहासपदं पुराणस्यापि उपलक्षणम्। मार्कण्डेयपुराणे एकाशीतितमं अध्यायादारभ्य त्रिनवतितमध्यायपर्यन्तं देवीमाहात्म्यम् वर्णितमस्ति। इदमेव त्रयोदशाध्यायं देवीमाहात्यं दुर्गासप्तशतीत्युच्यते। मार्कण्डेयपुराणे प्राप्यते-

"सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः।
निरामय तदुत्पत्ति विस्तरात्जगतो मम।।
महामायानुभावेन यथा मन्वन्तराधिपः।
स बभूव महाभागः सावर्णिस्तनयो रवेः।।
स्वारोचिषेऽन्तरे पुर्व्वं चैत्रवंशसमुद्भवः।
सुरथो नाम राजाऽभुत् समस्ते क्षितिमण्डले"।।[3]

एतदपि साहित्यदर्पणे प्राप्यते-

---

[1] साहित्यदर्पणः (षष्ठः परिच्छेदः), लोकमणि दाहाल एवं त्रिलोकीनाथ द्विवेदी (सम्पादकौ), कारिका- ३१५

[2] तत्रैव, कारिका- ३१६-३१७

[3] मार्कण्डेयपुराणम् (एकाशितमाध्यायः), वृन्दावनदास(अनुवादकः), श्लोकाः – १-३

"चत्वारस्तस्य वर्गाः स्युस्तेष्येकं च फलं भवेत्॥
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम्॥
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह॥
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्॥"[4]

नीतिप्रसंगेनार्थे, उपासनया धर्मे, सुरथस्य समाधेश्च भोगवर्णनेन कामे, सुरथस्वराज्यप्रत्यावृत्या समाधिमोक्षप्राप्तश्च उपासनारूपधर्मोऽत्र मुख्यप्रयोजनमिति दर्शितम्। अत्र महाशक्तेः नमस्क्रिया प्रत्यक्षमेव। खलनिन्दा-सदगुणकीर्तनं च यत्र तत्र वर्तते एव, तत्रैव नातिस्वल्पा नातिदीर्घा अष्टादशसर्गा सन्ति। ते च सर्गा एकवृत्तमयावसानेऽन्यकृत्तकाश्च सन्ति एव। केचन तेषु नानावृत्तमयाश्च। सन्ध्या-सूर्येन्दुरजन्यादीनामपि वर्णनं यथायोगं निबद्धमेव। नायकस्य सुरथस्य नाम्नाऽस्य महाकाव्यस्य नामकरणं सुरथचरितमिति। सर्गस्योपादेयकथया सर्गनामानि सन्तीति सर्गान्तपुच्छिकया स्पष्टमेव। पण्डितेन क्षेमधारिसिंहशर्मणा विरचितस्य सुरथचरितमहाकाव्यस्य मुख्य रसः शान्तः। किन्तु वर्णन-वैषम्यक्रमेण श्रृङ्गारस्यापि प्राशस्त्यमस्त्येव। गौणरूपेण यथास्थलं हास्य-करुण-रौद्र-वीर-भयानक-वीभत्साद्भूतरसा अपि वर्णिताः। सुरथचरितमहाकाव्ये वर्णितं हास्यरसस्य उदाहरणं प्राप्यते द्वितीये सर्गे। यथा-

"विशालनागेन सुखेन गच्छन् प्रियां सुपत्नीं मनसा स्मरँश्च।
सिक्तः पयोभिर्विकलो युवान्तो वदत्यहो यानमदो न सुष्टु॥"[5]

भरताचार्यः नाट्यशास्त्रस्य रसविकल्पनामके षष्ठाध्याये हास्यरसस्य लक्षणं कृतवान्-
'अथ हास्यो नाम हासस्थायिभावात्मकः। स च विकृतवेषालंकारधार्ष्ट्यलौल्यकुहकासत्प्रलापव्यङ्गदर्शन

---

[4] साहित्यदर्पणः(षष्ठः परिच्छेदः), उदयचन्द्र वन्द्योपाध्याय(सम्पादकः), कारिका-३०२

[5] सुरथचितमहाकाव्यम् – २/१८

दोषोदाहरणादिभिविभावैरुत्पद्यते। तस्यौष्ठदंशननासाकपोलस्पन्दनदृष्टिव्याकोशाकुञ्चनस्वेदास्यराग-पार्श्वग्रहणादिभिरनुभावैरभिनयः प्रयोक्तव्यः व्यभिचारिणश्चास्य आलस्यावहित्थातन्द्रानिद्रास्वप्नप्रवोधा- सूयादयः। द्विविधाश्चयमात्मस्थः परस्थश्च। यदा स्वयं हसति तदात्मस्थः। यदापरं हासयति तदा परस्थः।'[6]

अतएव उपरिस्थितश्लोके एवं प्राप्यते- कामदेवः पयोसिक्तः विशालनागं वृद्धयानेन सह तुल्यते। अतएव तत्रापरं वृद्धयानं हि विशालनागं तुल्यार्थे हास्यास्पदो जायते। अतःपरं सुरथचरितमहाकाव्यस्य तृतीयसर्गे सम्भोगश्रृङ्गाररसस्य वर्णना प्राप्यते। यथा-

"दृढ़तमपरिरम्भैभवर्भाव्यैरधीरा
विविधविधिरतीशप्रक्रियाभिर्विविक्तम्।
कथमपि हि विचित्रा हावभावप्रभावै र्ज्वलयति मदनाग्नि मध्यरात्रे पुनः सा।"

साहित्यदर्पणकारस्य विश्वनाथस्य मतानुसारेण सम्भोगश्रृङ्गारस्य लक्षणं भवति-

दर्शनस्पर्शनादीनि निषेवेते विलासिनौ।
यत्रानुरक्तावन्योन्यं सम्भोगोऽयमुदाहृतः।।[7]

अर्थात् श्रृङ्गाररसे नायक-नायिका परस्परमनुरागयुक्तौ भोगलालसौ युवानौ इति। दर्शनं स्पर्शः अधरपानचुम्बनादयः सम्भोगश्रृङ्गारः कथितः। एतदपि चुम्बन-आलिङ्गनाद्यनुभवस्य बहवः भेदाः स्वीक्रियन्ते। अतएव गणनाऽसम्भवर्भवति चेत् विद्वांसः सम्भोगश्रृङ्गाररसमेकैवैवं मन्यते। साहित्यदर्पणे प्राप्यते-

"सङ्ख्यातुमशक्यतया चुम्बनपरिरम्भणादिबहुभेदात्।
अयमेक एव धीरैः कथितः सम्भोगश्रृङ्गारः।।
तत्र स्याहतुष्टकं चन्द्रादित्यौ तथोदयास्तमयः।
जलकेलिवनविहारप्रभातमधुपानयामिनीप्रभृतिः।।"[8]

---

[6] नाट्यशास्त्रम् (षष्ठोऽध्यायः), सुरेशचन्द्र बन्द्योपाध्याय, छन्दा चक्रवर्ती(अनुवादकौ), पत्राङ्कः- 143

[7] साहित्यदर्पणः (तृतीयः परिच्छेदः), लोकमणिदाहाल एवं त्रिलोकीनाथ द्विवेदी(व्याख्याकारौ), कारिका- २१०

[8] तदेव, कारिका- २११-२१२

तस्मिन्नपि सुरथचरितमहाकाव्यस्य तृतीये सर्गे नवत्रिंशतसंख्यकश्लोकेऽनुरूपं कथनं प्राप्यते। यथा-

"अतिशयरतिलीलारोतिरम्या निशादौ
मृगमदललिताङ्गैः कामकान्तं प्रियेशम्।
वशयति मृगनेत्रा कामकेलिप्रवीणा
नवनिधुनलीलावृत्तिरम्यप्रचारैः॥"[9]

एतदपि अन्तिमे एवं वक्तुं शक्यते सुरथचरितमहाकाव्यस्य अभ्यन्तरे न केवलं पूर्वोक्ततथ्यानां वर्णितानि सन्ति। महाकाव्याभ्यन्तरे ऋतुणां वर्णनम्, तन्मध्ये ग्रीष्मस्य, प्रावृषः अर्थात् वर्षायाः, शरदः, हेमन्तस्य, शीतस्य वर्णना प्राप्यते। एतदपि प्रकृतिवर्णनप्रसङ्गे सन्ध्यायाः, सूर्यस्य, चन्द्रस्य, रजन्याः प्रभृतीनां वर्णना प्राप्यते। अपि च कवेः देव-देवी-माहात्म्यवर्णना सुस्पष्टरूपेण दरीदृश्यते।

i.अर्वाचीनसंस्कृतसाहित्ये सुरथचरितमहाकाव्यस्य स्थानं निरूपयितुम्,
ii.सुरथचरितमहाकाव्यरचनाभ्यन्तरे कवेः काव्यप्रतिभाविचारार्थम्,
iii.अस्मिन् महाकाव्ये काव्यशास्त्रीयप्रभावान्वेषणार्थम्,
iv.महाकाव्येऽस्मिन् आध्यात्मिकतत्त्वरहस्यनिरूपणार्थम्,
v.सुरथचरितमहाकाव्ये पर्यावरणस्य स्थानमन्वेषणार्थञ्च -
शोधकार्यमिदं परमप्रयोजन्।

**उपसंहारः-** कविक्षेमधारिसिंहमहोदयेन विरचितेऽस्मिन् सुरथचरितमहाकाव्ये विविधविषयाः दृश्यन्ते। येषु विषयेषु वर्तन्ते काव्यशास्त्रीयाः, आध्यात्मिकाः, पर्यावरणात्मिकाः, सांस्कृतिकाश्चेति। अतः एतद्विषयं विचिन्त्य तदादाय च मनुष्याणां जीवने ऐहिकं पारलौकिकं कल्याणञ्च भविष्यतीति कथ्यते। तद्धेतौ कविक्षेमधारिसिंहविरचितसुरथचरितमहाकाव्यमाधारीकृत्य शोधकार्यमपेक्ष्यते इति शम्।

## सन्दर्भ-ग्रन्थाः -

**मूलग्रन्थः -**

*क्षेमधारिसिंहशर्माविरचितं सुरथचरितम्*, तेजनाथझा विद्यालंकार (सम्पादकः), क्षेमधारिस्मृति प्रकाशन, मधुवनी, दरभङ्गा, विहार, १९६७

---

[9] सुरथचरितमहाकाव्यम् – ३/३९

**सहायकग्रन्थाः -**

*विश्वनाथकविराजस्य साहित्यदर्पणः*, लोकमणि दाहाल, त्रिलोकीनाथ दिवेदी(सम्पादकौ), चौखम्वा सुरभारती प्रकाशन, वाराणसी, २०१७

*विश्वनाथकविराजस्य साहित्यदर्पणः*(षष्ठः), उदयचन्द्र बन्द्योपाध्याय (सम्पादकः), ३य संस्करण, संस्कृत बुक डिपो, कलिकाता, २००६

*मार्कण्डेयपुराणम्* (एकाशीतितमाध्यायः), वृन्दावनदास(अनुवादकः), लाला श्यामलाल हीरालाल श्यामकाशी प्रेस, मथुरा, १९४१

*भरताचार्यस्य नाट्यशास्त्रम्* (षष्ठाध्यायः), सुरेशचन्द्र वन्द्योपाध्याय, छन्दा चक्रवर्ती (अनुवादकौ), ६ष्ठ मुद्रण, नवपत्र प्रकाशन, कलिकाता, २०१४

# श्वेताश्वतरोपनिषदि योगदर्शनसम्मतेश्वरतत्त्वसमीक्षणम्

डा. स्वपनमालः
सहायकाध्यापकः
संस्कृतविभागः
रायगञ्जविश्विद्यालयः
उत्तरदिनाजपुरम्, पश्चिमबङ्गः
Email- swapanmalvb@gmail.com

संक्षिप्तसारः

महतो भारतवर्षस्य प्राचीना परम्परा मानवधर्मस्य भावना इहलौकिकपारलौकिकविषयाणामवधारणा च वैदिकसाहित्येष्वेव वर्तते। मनुना कथितम् – वेदोऽखिलो धर्ममूलमिति।[1] वैदिकसाहित्यस्यान्तिमे उपनिषत्साहित्यं तथा वेदान्तसाहित्यं विराजते। इदमुपनिषत्साहित्यं भवति समग्रस्य वैदिकसाहित्यस्य सारसंकलनम्। अस्मिन्नुपनिषत्साहित्येऽष्टोत्तरशतोपनिषदो विद्यन्ते। शङ्कराचार्यस्य भाष्यमवलोक्य गवेषका उपनिषत्साहित्यं विभाजनद्वयं कृतवन्तः प्रधानाप्रधानभेदेन। कृष्णयजुर्वेदीयश्वेताश्वतरोपनिषदः भाष्यं शङ्कराचार्येण विरचितं न वेति विषयमाधारीकृत्य तदुपनिषदः मुख्यगौणत्वमपि न निर्णीतम्। इयमुपनिषद् 113 संख्यकमन्त्रसमन्विता। अत्र सांख्ययोगवेदान्तदर्शनानां तत्त्वानां प्रतिफलनं दृश्यते। विशेषतयाऽत्रोपनिषदि योगतत्त्वानां वर्णनं परिलक्ष्यते।

योगतत्त्वेषु चित्तवृत्ति-चित्तभूमि-योगसाधन-ईश्वर-अष्टाङ्गयोगः-योगैश्वर्य-समाधि-कैवल्यतत्त्वञ्चालोचितं स्यात्। विस्तृतिभयादस्मिन् शोधपत्रे केवलमीश्वरतत्त्वमालोचितं पातञ्जलयोगदर्शनानुसारेण।

मुख्यशब्दाः- उपनिषद्, योगः, त्रिक्ततत्त्वम्, ईश्वरः, प्रणवः, भक्तिः, कैवल्यम्।

श्वेताश्वतरेपनिषदि प्रतिफलितेषु दार्शनिकतत्त्वेषु योगदर्शनमन्यतमम्। युज् धातो उत्तरं घञ् प्रत्यययोगेन योगः शब्दः साधुः। युज् धातुः समाध्यर्थे गृहीतः। अतः योगशब्दस्यार्थो भवति समाधिरिति व्युत्पत्त्यनुसारेण। योगसूत्रकारेण आचार्येण पतञ्जलिना कथितम् – योगश्चित्तवृत्तिनिरोधः।[2] भगवता व्यासेनोक्तम् – योगः समाधिः।[3] योगदर्शनस्य महत्वविषये मोक्षधर्मे कथितम् – नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम्। अर्थात् सांख्यतुल्यं ज्ञानं नास्ति तथा योगसदृशं बलमपि नास्ति। वैदिकसाहित्येषु योगदर्शनतत्त्वस्य विविधाः चर्चाः परिलक्ष्यन्ते। ऐतिह्यानुसारेण हिरण्यगर्भेश्वरो भवति योगशास्त्रस्यादिवक्तृपादः। केषाञ्चिन्मते तु हिरण्यगर्भशब्देन कपिलोऽभिहितः। मुनिः कपिलः भवति सांख्यस्य योगस्य च मूलप्रवक्ता। श्वेताश्वतरोपनिषदि झंकृतम् –

ऋषिं प्रसूतं कपिलं यस्तमग्रे
ज्ञानैर्विभर्ति ज्ञायमानं च पश्येत्।।[4]

सांख्ययोगदर्शनाभ्यां ज्योतिर्मयं परमात्मतत्त्वं विदितं स्यादित्यस्यामुपनिषद्युद्घोषितमस्ति -

नित्यो नित्यानां चेतनश्चेतनानाम्
एको बहूनां यो विदधाति कामान्।
तत्कारणं सांख्ययोगाधिगम्यं
ज्ञात्वा देवं मुच्यते सर्वपाशैः।[5]

षष्ठाध्यायसमन्वितायां श्वेताश्वतरोपनिषदि योगदर्शनस्य विविधानि तत्त्वानि प्राप्तानि। विशेषतया अस्यामुपनिषदि द्वितीयाध्याये योगतत्त्वं स्पष्टतया प्रतिविम्बितमस्ति। महन्तः गवेषकाः R. D. Ranade महाभागाः कथितवन्तः – As for the root of the Yoga system, We must also turn to the Svetasvatara which in its locus classicus. There is a passage of very peculiar interest in the second chapter of the Svetasvtara which gives us the rudiments of the practice and philosophy of the Yoga doctrine as later formulated.[6] वैदिकोत्तरकाले योगाभ्यासस्य प्रतिफलनं दृश्यते उपनिषद्साहित्ये। कठोपनिषदि श्वेताश्वतरोपनिषदि च न केवलं योगतत्त्वस्य सांख्यतत्त्वस्यापि वर्णनं दृश्यते। अस्मिन् विषये विद्वान् पल-डयसेनमहोदयस्य मतं भवति – In post Vedic times the practice of Yoga was developed into a formal system with its own textbook(the sutras of Patanjali). The rise of this system, as its first beginnings in Kath.3 and 6, Sve.2 and Maitr.6 show belongs to the time when the original idealism of the Upanishad teaching began already to harden into the realistic philosophy of the Samkhya. On this foundation, which was far from being adapted to its original conception, the Yoga system was raised.[7]
कठोपनिषदि कथितमस्ति – तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्।[8] अर्थात् येन इन्द्रियानि स्थिराणि भवन्ति तद्योगः। तत्त्ववैशारदीकारः वाचस्पतिमिश्र उक्तवान् –

क्षिणोति च क्लेशान् योगः।[9] अर्थात् यन्निरोधक्लेशानां नाशस्य हेतुः तद्योगः। योगवार्तिककारेण विज्ञानभिक्षुनोक्तम् – तदा द्रष्टुः स्वरूपेऽवस्थानं योगः।[10] अर्थात् यन्निरोधः द्रष्टुः पुरुषस्य स्वरूपेऽवस्थानस्य हेतुर्भवति तद्योग इति। बौद्धदर्शने उद्धृतमस्ति – तत्राप्राप्तस्यार्थस्य प्राप्तये पर्यनुयोगो योगः।[11] अर्थादज्ञातविषयानां ज्ञानाय यत्प्रश्नो भवति तद्योगः। पाशुपतदर्शने उक्तमस्ति – चित्तं द्वारेणेव संबन्धहेतुर्योगः।[12] श्रीमद्भगवद्गीतायां कथ्यते योगविचारो वेदेन सह सम्बन्धयुक्तः –

> इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।
> विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्।।
> एवं परम्पराप्राप्तमिमं राजर्षयो विदुः।
> स कालेनेह महता योगो नष्टः परन्तपः।।
> स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः।
> भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्।।[13]

अर्थात् भगवता श्रीकृष्णेन कथितम् – पूर्वस्मिन् काले इदं योगतत्त्वं सूर्यं कथितवान्। सूर्योऽपि तत्पुत्रं मनुं कथितवान्। मनुः तत्पुत्रम् इक्ष्वाकुमुक्तवान्। अनेन प्रकारेण राजर्षयः योगतत्त्वमवगतवान्। हे परन्तप ! कालक्रमेण योगऽयमवलुप्तोऽभवत्। अधुना तव समीपे तद्योगतत्त्वं व्याख्यातवान्। त्वं हि मम बान्धवो भक्तश्च। तस्मात् कारणात्

तव समीपे इदं योगतत्त्वं व्याख्यातम्। योगविषये श्रीमद्भगवद्गीतायामुक्तमस्ति –

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।।[14]

अर्थात् हे धनञ्जय ! फलवासनापरित्यागपूर्वकं परमेश्वरपरायणं भूत्वा सिद्धिमसिद्धिञ्च सदृशं ज्ञात्वा कर्मानुष्ठानं कुरु। सिद्ध्यसिद्ध्योः तुल्यज्ञानं हि योगः। आचार्येण श्रीधरस्वामिना तस्य टीकायामुक्तम्- योगः परमेश्वरैकपरता। तत्र स्थितः कर्माणि कुरु। तथा सङ्गं कर्तृत्वाभिनिवेशं त्यक्त्वा केवलमीश्वराश्रयेणैव कुरु। तत्फलस्य ज्ञानस्यापि सिद्ध्यसिद्ध्यो समो भूत्वा केवलमीश्वराश्रयेणैव कुरु। यत एवंभूतं समत्वमेव योग उच्यते सद्भिः चित्तसमाधानरूपत्वात्।[15] अपरे श्लोके कथितम् –

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।।[16]

श्लोकस्यास्य व्याख्यायां शङ्कराचार्येणोक्तम् – समत्वबुद्धियुक्तः सन् स्वधर्ममनुतिष्ठन् यत्फलं प्राप्नोति तच्छृणु बुद्धीति। बुद्धियुक्तसमत्वविषयाः बुद्ध्याः युक्तो बुद्धियुक्तः। स जहाति परित्यजति इहास्मिन् लोके उभे सुकृतदुष्कृते पूण्यपापे सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण यतः तस्मात् समत्वबुद्धियोगाय

युज्यस्व घटस्व। योगो हि कर्मसु कौशलम्। स्वधर्माख्येसु कर्मसु वर्तमानस्य या सिद्ध्यासिद्ध्योः समत्वबुद्धिरीश्वरार्पितचेतस्तया तत्कौशलं कुशलभावः। तद्धि कौशलं यद् बन्धस्वभावान्यपि कर्माणि समत्वबुद्ध्या स्वभावान्निवर्त्तन्ते।[17] अर्थात् संक्षेपेण वक्तुं शक्यते बुद्धियोगनिष्ठः मानवोऽस्मिल्लोँके पापपूण्यं परित्यज्य समत्वबुद्धिरूपं योगमभिनिविशते। अयं योगश्चतुर्विधः – मन्त्र-लय-हठ-राजयोगश्चेति। योगानां राजा राजयोग इति। पातञ्जलयोगः राजयोग इति कथ्यते सर्वयोगसमन्वयात्।

श्वेताश्वतरोपनिषदि पातञ्जलयोगसम्मतं तथा राजयोगसम्मतं विविधतत्त्वं प्रतिफलितमस्ति। अस्यामुनिषद्यामन्त्रितम् –

ते ध्यानयोगानुगता अपश्यन्
देवात्मशक्तिं स्वगुणैर्निगूढाम्।
यः कारणानि निखिलानि तानि
कालात्मयुक्तान्यधितिष्ठत्येकः।।[18]

यः परसात्मा कालादीनां निखिलकारणानां यथानियमानुसारेण परिचालयति, तस्य देवस्य स्वात्मभूतत्रिगुणात्मिकां शक्तिं पूर्वोक्ताः ब्रह्मवादिनः समाधिसहायेन परमात्मनः जगत्कारणत्वसहायरूपेण दर्शितवन्तः। महर्षिः श्रीमत् अनिर्वाणः कथितवान् – श्वेताश्वतरोपनिषद् ध्यानयोगं मुख्यसाधनरूपेण गृहीतवती। पातञ्जलयोगेन सहैकात्मत्वं परिस्कृतं स्यात्।[19] अत्र देवपदेन ईश्वरतत्त्वं प्रतिष्ठितं भवति।

पातञ्जलयोगदर्शने ईश्वरतत्त्वमङ्गीकृतमस्ति। तस्मात् योगदर्शनं सेश्वरसांख्यमिति नाम्नाऽभिहितम्।

योगतत्त्वानुसारेण ईश्वरः परमपुरुषः। सांख्यसम्मतपुरुषतत्त्वात् भिन्नोऽयं पुरुषः। अयमीश्वररूपपरमपुरुषः सर्वेषु जीवेषु पुरुषेषु वान्तरे विद्यमानोऽस्ति। जीवः तथा पुरुषः बद्धदशाग्रस्तं भूत्वा क्लेशान्ननुभवति। परन्तु ईश्वरः मुक्तपुरुषाद्भिन्नः नित्यमुक्तस्वरूपः। नास्ति तस्य क्लेशभोगः। साधारणपुरुषेभ्यः सह पार्थक्यीकरणार्थं महर्षिः पतञ्जलिः सूत्रयति – क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः।[20] अर्थात् अविद्यादिपञ्चक्लेशः धर्माधर्मः जातिः आयुः भोगः संस्कारश्च यत्र नास्ति तत्पुरुषविशेष ईश्वरः। ईश्वरस्यैश्वर्य्यं साम्यातिशयरहितम्। तत्तुल्यमैश्वर्य्यं नास्ति कुत्रापि। तस्मादैश्वर्य्यस्य यत्र पराकाष्ठा तथान्तिमावस्था तत्रैश्वरः। ईश्वरतुल्यमैश्वर्य्यसम्पन्नं कोऽपि न भवति व्याघातत्वात्। भाष्यकारो व्यासदेवः निरूपितवान् – तस्यैश्वर्य्यं साम्यातिशयविनिर्मुक्तं न तावत् ऐश्वर्य्यान्तरेण तदतिशय्यते, यदेवातिशयि स्यात् तदेव तत्स्यात्। तस्मात्तत्र काष्ठाप्राप्तिरैश्वर्य्यस्य स ईश्वरः। न च तत्समानमैश्वर्य्यमस्ति। कस्मात् द्वयोस्तुल्ययोरेकस्मिन् युगपत् कामितेऽर्थे नवमिदमस्तु पुराणमिदमस्तु इत्येकस्य सिद्धौ इतरस्य प्राकाम्यविघातादूनत्वं प्रसक्तं द्वयोश्च तुल्ययोर्युगपत् कामितार्थप्राप्तिर्नास्त्यर्थस्य विरुद्धत्वात्। तस्माद् यस्य साम्यातिशयविनिर्मुक्तमैश्वर्य्यं स ईश्वरः स च पुरुषविशेष इति। श्वेताश्वतरोपनिषदीश्वरस्वरूपविषये कथितमस्ति –

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।
अमृतस्य परं सेतुं दग्धेन्धनमिवानलम्।।[21]

यः निष्कलङ्कः अखण्डः निष्क्रियः शान्तः अनिर्वचनीयः अनिन्द्यः निर्लेपः अमरलोकस्य सेतुस्वरूपः दग्धेन्धनवदग्निस्वरूपः स ईश्वरः परमात्मा वा।

अपरस्मिन् मन्त्रे उद्घोषितम् –

एतज्ज्ञेयं नित्यमेवात्मसंस्थं
नातः परं वेदितव्यं हि किञ्चित्।
भोक्ता भोग्यं प्रेरितारञ्च मत्वा
सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्।।[22]

संक्षेपेण सारण्याकारेण वक्तुं शक्यते -

| भोक्ता | भोग्यम् | प्रेरिता |
|---|---|---|
| जीवः | निखिलानित्यपदार्थः | ईश्वरः |

एतत्त्रिविधं तत्त्वं ब्रह्मरूपेण ज्ञात्वा साधकः सर्वदा स्वान्तरेऽनुभवति। यद्धेतौ ब्रह्मज्ञानातिरिक्तं नास्ति किञ्चित् ज्ञातव्यम्। ईश्वरस्य ज्ञानं निरतिशयम्। तत्तुल्यं ज्ञानं नास्ति कस्यापि। ज्ञानमिदमीश्वरस्य सर्वज्ञतायाः साधकम्। योगसूत्रेऽभिहितम् – तत्र निरतिशयं सर्वज्ञबीजम्।[23] भूत-वर्तमान-अनागतागिविषयकमिन्द्रियातीतज्ञानं यस्यास्ति स सर्वज्ञः। ज्ञानमेतद् विशेषरूपेण प्रवर्ध्य यत्र निरतिशयं भवति किंवा यस्याधिकं नास्ति किञ्चिज्ज्ञानं स सर्वज्ञः। योगसूत्रव्यासभाष्ये

कथितमस्ति-
यदिदमतीतानागतप्रत्युत्पन्नप्रत्येकसमुच्चयातीन्द्रियग्रहणमल्पं बहु इति सर्वज्ञबीजम्, एतद्धि वर्धमानं यत्र निरतिशयं स सर्वज्ञः।[24] ईश्वरस्य सर्वज्ञत्वविषये श्वेताश्वतरोपनिषदि श्रुतिप्रमाणं विद्यते –

स विश्वकृद्विश्वविदात्मयोनि -
र्ज्ञः कालकारो गुणी सर्वविद् यः।
प्रधानक्षेत्रज्ञपतिर्गुणेशः
संसारमोक्षस्थितिबन्धहेतुः।।[25]

य अव्यक्तस्य व्यक्तस्य पालकः यः सत्त्वादिगुणानामधीश्वरः यः संसारे बद्धदशायाः मुक्तेश्च कारणं यो जगत्स्रष्टा सर्वात्मा सर्वकारणं चैतन्यस्वरूपः कालकर्ता गुणी सर्वविषये ज्ञानवान्।
योगसूत्रे प्रतिफलितमस्ति - तस्य वाचकः प्रणवः।[26] ईश्वरो भवति प्रणवस्य वाच्यः। इदं वाच्यवाचकत्वं संकेतकृतं न वा प्रदीपाकाशवदवस्थितिः? अनेन प्रकारेण वाच्य-बोध्य-ज्ञेयः ईश्वरः वाचकेन प्रणवेन साकं सम्बन्धावच्छिन्नः। ईश्वरस्य संकेतं तु शब्दस्थितं तदस्तित्वं शब्दार्थं द्योतयति। प्रणवस्य जपो भवति प्रणवाभिधेयस्य वाच्यस्येश्वरस्य भावना। प्रणवजपत्वात् साधकस्य चित्तमेकाग्रं भवति। व्यासभाष्ये झंकृतमस्ति – प्रणवस्य जपः प्रणवाभिधेयस्य चेश्वरस्य भावना। तदस्य योगिनः प्रणवं जपतः प्रणवार्थञ्च भावयतश्चित्तमेकाग्रं सम्पद्यते।[27] एतद्विषयकं योगसूत्रं भवति – तज्जपस्तदर्थभावनम्।[28] श्वेताश्वतरोपनिषद्यप्यनुरूपमभितं दृश्यते –

वह्नेर्यथा योनिगतस्य मूर्ति -

र्न दृश्यते नैव च लिङ्गनाशः।
स भूय एवेन्धनयोनिगृह्य –
स्तद्वोभयं वै प्रणवेन देहे।।
स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम्।
ध्याननिर्मथनाभ्यासाद्देवं
पश्येन्निगूढवत्।।[29]

काष्ठगताग्नेस्वरूपं यथा दृश्ययोग्यं न भवति तथापि तद् सूक्ष्मावस्था विनष्टं न स्यात्। यस्मात् काष्ठघर्षणेन तत्राग्निरुत्पद्यते। आत्माऽपि प्रणवेनास्मिन् देहे नोपलब्धो भवति। स्वीयशरीरमधरारणिं प्रणवमुत्तरारणिं मत्वा पुनः पुनः ध्यानेन वह्निवदाच्छादितं ज्योतिर्मयं परमेश्वरं पश्यतीत्युपदेशः। प्रणवजपपूर्वकं परमेश्वरस्य ध्यानं सर्वकर्मफलञ्च तत्रेश्वरे समर्पणं भवति ईश्वरप्रणिधानम्। योगसूत्रकारेणोक्तम् – ईश्वरप्रणिधानाद्वा।[30] भाष्यकारेण स्फटिकीकृतं यत् – प्रणिधानाद् भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्नाति अभिध्यानमात्रेण, तदभिध्यानादपि योगिन आसन्नतमः समाधिलाभः फलञ्च भवतीति।[31] ईश्वरं प्रति प्रणिधानेन भक्तिमूलकविशेषोपासनामाध्यमेन एकाग्रतावलम्बनपूर्वकं ध्यानसहायेन योगीश्वराभिमुखीनं भवति तदा ईश्वरस्तमनुगृह्नाति। अभिध्यानेन तथा सम्यक् ध्यानेन साधकः तत्फलं समाधिं प्राप्नोति। श्वेताश्वतरवचनेऽप्यस्य मतस्य समर्थनं दृश्यते। तत्र विधृतमस्ति –

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।

तस्यैते कथिता ह्यर्थाः प्रकाशन्ते
महात्मनः प्रकाशन्ते महात्मनः।।[32]

श्वेताश्वतरोपनिषदः प्रख्यातः टीकाकारो विज्ञानभगवत्पादः तस्य श्वेताश्वतरोपनिषद्विवरणमिति टीकायामस्य मन्त्रस्य व्याख्यानकाले कथितवान् – देवतागुरुविषयनिरुपाधिकभक्तेर्विद्याप्राप्तावन्तरङ्गसाधनत्वमाह – यस्य देवे इति। यस्य पुरुषस्य देवे परमेश्वरे परोत्कृष्टा निरुपाधिका भक्तिर्यथा तथा निरुपाधिका भक्तिरेव गुरावपि विद्यते गुरुदेवतयोरेकत्वबुद्या तस्य देवतागुरुविषयनिरुपाधिकभक्तिमतो योग्याधिकारिण एते कथिता अस्यामुपनिषदि भगवता श्वेताश्वतरेण कथिता उपदिष्टा हि यस्मादर्थाः प्रकाशन्ते यथावत्प्रकाशन्ते महात्मनो महानुभवाय नान्यस्येति यस्मात्तस्मातद्विद्यार्थिभिर्देवतागुरुविषया निरुपाधिका भक्तिः कर्तव्येत्यभिप्रायः।[33] अत्र भक्तियोगेन साधकः तथा अधिकारी देवमीश्वरं वा भावयति तर्हि तस्य साधकस्य क्रमेणेश्वरप्राप्तिस्तथा कैवल्यप्राप्तिर्भवेत्।

श्वेताश्वतरोपनिषदि विविधानां दार्शनिकतत्त्वानां योगतत्त्वं विशिष्टस्थानं लभते। अत्र साधकस्य चित्तभूमीनामुत्कर्षतायाश्चित्तवृत्तिनिरोधे समाधिरुत्पद्यते। अष्टयोगाङ्गानां सहायेन अभ्यासवैराग्याभ्यां प्रणवजपेन च साधकः परमपुरुषमीश्वरं साक्षात्करोति। अस्या उपनिषदोऽन्तिममन्त्रेण भक्तियोगस्य स्पष्टं समर्थनं तथा भक्तिशब्दस्य सर्वप्रथमप्रयोगोऽपि परिलक्ष्यते। अतः

श्वेताश्वतरोपनिषद् साधकस्य समीपे ईश्वरप्राप्त्यर्थममृततुल्येति हेतौ कथ्यते – शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः।।[34]

References:

[1] Manava Dharma Sastra, Vishvanath Narayan Mandlik, Ganpat Krishnajis Press, Bombay, 1886, मनुसंहिता – 2/6

[2] पातञ्जल योगदर्शन, स्वामी भर्गानन्द, उद्‌बोधन कार्यालय, कलकाता, 2004, योगसूत्रम् – 1/2

[3] तदेव, योगसूत्रव्यासभाष्यम् – 1/1

[4] कृष्णयजुर्वेदीयश्वेताश्वतरोपनिषच्छांकरभाष्योपेता तथा शंकरानन्दकृता श्वेताश्वतरोपनिषद्दीपिका नारायणकृता श्वेताश्वतरोपनिषद्दीपिका विज्ञानभगवत्कृतं श्वेताश्वतरोपनिषद्विवरणम्, विनायक गणेश आपटे(सम्पादकः), आनन्दाश्रममुद्रणालयः, पुण्याख्यपत्तनम्, 1927, श्वेताश्वतरोपनिषद् – 5/2

[5] तदेव – 6/13

[6] A constructive survey of Upanishadic philosophy, R.D. Ranade, Bharatiya Vidya Bhavan, Bombay, 1986, P. 137

[7] Deussen, Paul, & Gedon, Rev. A. S.(Translator),The Philosophy of the Upanishads, MLBD, Delhi, 1st ed. 1999, RPt. 2011 141 The Philosophy of the Upanishads,

Deussen, Paul, & Rev. A. S. Gedon (Translator),The Philosophy of the Upanishads, MLBD, Delhi, 1st ed. 1999, RPt. 2011, P-384

[8] कठोपनिषद् – 2/3/11

[9] द्रष्टव्यम्, भारतीय दर्शन परिभाषा कोष, दीननाथ शुक्ल, प्रतिभा प्रकाशन, दिल्ली, 1म संस्करणम् 1993, पृ-208

[10] तदेव

[11] सर्वदर्शनसंग्रहः(1), सत्यज्योति चक्रवर्ती, साहित्यश्री, कलिकाता, 1419बङ्गाव्दः, पृ-38

[12] काश्मीरीय शैवदर्शन एवं स्पन्दशास्त्र (शिवसूत्र, स्पन्दसूत्र एवं शक्तिसूत्र समन्वित), श्यामाकान्त द्विवेदी, चौखम्बा सुरभारती प्रकाशन,वाराणसी, 1म संस्करणम् 2009, पाशुपतसूत्रम् – 5/2

[13] श्रीमद्भगवद्गीता, पूर्णचन्द्र विश्वासः(सम्पादकः), नदीया, 1389, 4/1-3

[14] तत्रैव – 2/48

[15] तत्रैव, श्रीधरस्वामीकृतदीका, 2/48

[16] श्रीमद्भगवद्गीता – 2/50

[17] तदेव, शाङ्करभाष्यम्, 2/50

[18] श्वेताश्वतरोपनिषद् – 1/3

[19] उपनिषत् प्रसङ्ग(7म खण्डः), श्रीमत् अनिर्वाण, बर्धमान विश्वविद्यालय, 1म प्रकाश 2011, पृ-7

[20] पातञ्जल योगदर्शन, स्वामी भर्गानन्द, उद्‌बोधन कार्यालय, कलकाता, 2004, योगसूत्रम् – 1/24

[21] श्वेताश्वतरोपनिषद् – 6/19

[22] तदेव – 1/12

[23] योगसूत्रम् – 1/25

[24] योगसूत्रव्यासभाष्यम् – 1/25

[25] श्वेताश्वतरोपनिषद् – 6/16

[26] योगसूत्रम् – 1/27

[27] योगसूत्रव्यासभाष्यम् – 1/27

[28] योगसूत्रम् – 1/28

[29] श्वेताश्तरोपनिषद् – 1/13-14

[30] योगसूत्रम् – 1/23

[31] योगसूत्रव्यासभाष्यम् – 1/23

[32] श्वेताश्वतरोपनिषद् – 6/23

[33] विज्ञानभगवत्कृतं श्वेताश्वतरोपनिषद्विवरणम् – 6/23

[34] श्वेताश्वतरोपनिषद् – 2/5

# अद्वैतवेदान्तस्य माययातत्त्व-सांख्यदर्शनस्य प्रकृतितत्त्वयोः तुलनात्मकमध्ययनम्

सुरजरायः
गवेषकः, संस्कृतविभागः, रायगञ्जविश्वविद्यालयः
तथा च
डा.स्वपनमालः
सहायकाध्यापकः, संस्कृतविभागः
रायगञ्जविश्वविद्यालयः

## शोधसारः

ज्ञायतेऽस्माभिः यदद्वैतवेदान्तस्य ब्रह्मसत्यं जगन्मिथ्येति मुख्यतया प्रतिपाद्यते। अपरस्मिन् पक्षे सांख्यदर्शनन्तु द्वैतप्रतिपादको मन्यते। मिथ्यात्मकस्य जगतो कारणतया माया अविद्या वा अज्ञानं वेति स्वीक्रियन्तेऽद्वैतवेदान्तिकैः। माययैव जगत्सत्यरूपेण प्रतिभाति। अपरस्मिन् पक्षे जगतः कारणतया सत्वरजस्तमसां साम्यावस्थां प्रकृतिमेव मन्यते। अत्र अद्वैतवेदान्तस्य मायातत्त्वेन सह सांख्यदर्शनस्य प्रकृतितत्त्वस्य सादृश्यं वैसादृश्यं च दर्शितं भवति। अत्र हि अद्वैतवेदान्तस्य मायातत्त्वेन साकमपि च सांख्यदर्शनस्य प्रकृतितत्त्वस्य तुलनात्मकमध्ययनं क्रियते निम्नप्रकारेण।

**मुख्यशब्दाः-** वेदान्तदर्शनम्, ब्रह्म, जगत्, माया, सांख्यदर्शनम्, प्रकृतिः, पुरुषः, गुणाः।

अद्वैतवेदान्तस्योपस्थापकाचार्यशङ्करमते निष्प्रपञ्चब्रह्म एव उपनिषत्समूहानां यथार्थप्रतिपाद्यं वर्तते। जीवेश्वरजगतश्च स्वरूपमेव ब्रह्म इति। आत्मैव ब्रह्म, ब्रह्म एवात्मा वेति। ब्रह्म तु सच्चिदानन्दस्वरूपः। पारमार्थिकदृष्ट्यां ब्रह्मैव सत्यं जगन्मिथ्येति कथ्यते। प्रमाज्ञानस्य विषयो

जगद्बाधितत्वात् मिथ्येत्यभिधीयते। अतो तु अद्वैतवादीनः जगत्प्रपञ्चं मायेत्युच्यन्ते।

जगतः मिथ्यात्वप्रतिपादनार्थमाचार्येण शङ्करेण ब्रह्मणः शक्तिरेका स्वीकृता। अघटनघटनपटीयसी या शक्तिः ब्रह्मणमावृतं कृत्वा तस्योपरि जगत्प्रपञ्चमारोपयति, सैव माया अविद्या वा अज्ञानं वेत्यद्वैतमतं स्यात्। अनात्मान्यात्मबुद्धिर्वा साऽविद्या परिकीर्तिता इति। माया अविद्या अज्ञानम् अध्यासप्रभृतयः समार्थकरूपेण मन्यते शङ्कराचार्येण। ब्रह्मसूत्रभाष्ये आचार्येण शङ्करेण मायाऽविद्ये शब्दोभौ समार्थकरूपेण व्यवहृयते। तथापि कोऽप्यन्याः वेदान्तवादीनः शब्दोभौ पृथगर्थे प्रयुक्तवन्तः। मतमिदं युक्तिसम्मतं नैव स्यात्। श्रूत्यामुक्तम् – ईश्वरस्तु माययैव जगदसृजत्। अतो वक्तुं शक्यते ईश्वरेच्छाधीन अज्ञानशक्तिरेव मायेति। पुनश्च आवरणशक्तियुत अज्ञानमेवाविद्येति। मतेऽस्मिन् विक्षेपस्तु प्रधानकार्यं मायायाः, अविद्यायाश्चावरणमिति मूलं कार्यम्। माधवाचार्येणोक्तं सर्वदर्शनसंग्रहे –

माया विक्षिपदज्ञानमीशेच्छावशवर्ती वा।
अविद्याच्छादयत्तत्वं स्वातन्त्र्यानुविधायि वा।।[1]

मायाया अविद्यायाः वा कार्यद्वैविध्यं वर्तते, आवरण विक्षेपञ्चेति। आवरणस्य कार्यं वर्तते सत्यस्यावृतकरणम्। अविद्याया आवरणशक्तेः प्रभावेन सत्यमाच्छादितं भवति। सत्यस्य मुखं मुखस्वरूपं वाऽऽवृतं स्यादिति तथ्यं इशोपनिषदि दृश्यते। यथा- "हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्"[2] इति। शङ्करमते मायोपहितम् अज्ञानोपहितं वा भूत्वा ब्रह्म तु कल्याणगुणस्याधारं ईश्वरकारणं जगत्कारणं वा भवति। जपाकुसुमं यथा समीपस्थस्फटिकस्योपरि स्वस्य रक्तवर्णस्यारोपं करोति, मायारूपोपाधिः समीपस्थब्रह्मणि आरोपितत्वात् ब्रह्मण उपाधिः नाम्ना

---

[1] सर्वदर्शनसंग्रह(द्वितीयखण्ड), सत्यज्योति चक्रवर्ती, पत्रसंख्या-३१०

[2] इशोपनिषद्-१६

विधियते। मायोपहितचैतन्यं ब्रह्म वेति जगत्प्रपञ्चस्य उपादानकारणं भवति।

आचार्येण शङ्करेणोच्यते – रज्जु-सर्पयोः भ्रमस्थले रज्जुसम्बन्धीय अज्ञानेन रज्ज उपरि सर्पाध्यस्तं भवति, तथैव ब्रह्मणि जगद्भ्रमो भवति। जगतः मूले त्वस्ति माया अज्ञानं वा अध्यासो वेति।अज्ञानम् अध्यासो वा जगद्भ्रमस्य कारणं वर्तते। अध्यासो नाम अतस्मिन् तद्बुद्धिरिति अथवा अध्यासो नाम "स्मृतिरूपः परत्र पूर्वदृष्टावभासः"[3] इति। अध्यास एव माया अज्ञानं वेति। माया स्वरूपतो भ्रमोत्पादनकारी अज्ञानविशेषो वर्तते। अज्ञानस्य लक्षणप्रसङ्गे वेदान्तसारकारेण सदानन्दयोगिन्द्रेणोच्यते – "अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चित् इति वदन्ति, अहमज्ञ इत्यादि अनुभवात्"[4] इति।अविद्याया अस्तित्वे श्रूतिप्रमाणमपि स्यात्। यथा – देवात्मशक्तिं स्वगुणैर्निगुढाम्[5] इति। अपि च "भूयश्चान्ते विश्वमायानित्तिः"[6] इति। उपदेशसाहस्री इति ग्रन्थे शङ्कराचार्येण अव्द्या प्रसङ्गमुर्द्धृयते। तत्र शिष्यमुखात् का सा अविद्या इति प्रश्ने सति गुरुः तामविद्यायाः स्वरूपमुक्तम् – "त्वं परमात्मनं सन्तमसंसारिणं संसार्यहस्मीति विपरीतं प्रतिपद्यसे, अकर्तारं सन्तं कर्तेति, अभोक्तारं सन्तं भोक्तेति, विद्यमानं चाविद्यमानमिति- इयमविद्या"[7] इति। पुनश्च मायायाः स्वरूपनिर्णयप्रसङ्गे शङ्कराचार्येण तस्य विवेकचूडामण्यामुक्तं – त्रिगुणात्मिका(सत्त्वरजस्तमात्मिका) अनादि माया अविद्या वा ब्रह्मणः शक्तिः वर्तते, सा माया अव्यक्तमपि कथ्यते। माययैव

---

[3] वेदान्तदर्शनम्, दुर्गाचरण, पत्रसंख्या-७

[4] वेदान्तसार, लोकनाथ चक्रवर्ती, पत्रसंख्या-२१

[5] श्वेताश्वतरोपनिषद्- १/३

[6] तदेव-१/१०

[7] उपदेशसाहस्री, गजाननशास्त्री, पत्रसंख्या-३००

अखिलस्य जगतः सृष्टिरभूत्। सृष्टिरूपकार्येणैव बुधैः मायाया अनुमानं क्रीयन्ते। न सा माया सत्स्वरूपा, नासत्स्वरूपा, नाप्युभयस्वरूपा च। न साऽविद्या भिन्नस्वरूपा, नाभिन्नस्वरूपा, नाप्युभयस्वरूपा च। सा माया साङ्गमपि नास्ति, अङ्गरहितमपि नास्ति, किंवा मायाया अविद्यायाः वा अङ्गमस्ति नास्ति वा खल्वेति वक्तुं नैव शक्यते। अतः माया त्वाश्चर्यरूपा वाक्यै अप्रकाश्या च। यथोक्तम् –

"अव्यक्तनाम्नी
परमेशशक्तिरनाद्यविद्यात्रिगुणात्मिका परा।
कार्यानुमेया सुधियैव माया यया जगत् सर्वमिदं
प्रसूयते॥
सन्नाप्यसन्नाप्युभयात्मिका नो
भिन्नाप्यभिन्नाप्युभयात्मिका नो।
सङ्गाप्यनङ्गाप्युभयात्मिका नो
महाद्भूतानिर्वचनीयरूपा॥"[8]

सांख्यदर्शनानुसारमखिलविश्वस्यासंख्यपरिवर्तनशीलपदार्थाः तेषामुपादानेभ्यैव जायन्ते। तान्युपादानानि पुनः क्वचिदन्येषां कारणानां कार्याणि स्युः। एवं हि कीर्य-कारणयोऽयं श्रृङ्खलाया अन्वेषणं कुर्वन् बुधैः विश्वसृष्टेः मूलकारणमेकमनुमीयते। मूलकारणमिदं सांख्यशास्त्रे प्रधानः, अव्यक्तः, प्रकृतिः इत्यादि नाम्ना प्रदर्शितं स्यात्। अस्य मूलकारणस्य प्रकृतेः वा किमप्यन्यकारणं नैव वर्तते। यतो हि सांख्यसूत्रकारेण मुनिना कपिलेन मूलप्रकृतिममूलमुपादानकारणरहितमित्युक्तम्। यथा सांख्यसूत्रम् – "मूले मूलाभावादमूलं मूलम्"[9] इति।

[8] विवेकचूडामणि-११०, १११

[9] सांख्यसूत्रम्-१/६७

सांख्यशास्त्रे प्रकृतेरस्तित्वप्रतिपादनार्थं प्रकृतेः कार्याण्येव हेतवः मन्यन्ते। अथानुमानेन हि तस्या अस्तित्वं प्रतिपादितम्। सौक्ष्म्यात् हि प्रकृतेरूपलब्धिर्न भवतीति श्रीमदीश्वरकृष्णेणाह तस्य सांख्यकारिकायाम्, तद्यथा –

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्
कार्यतस्तदुपलब्धेः।
महदादि तच्च कार्यं प्रकृतिस्वरूपं
विरूपञ्च।।[10]

प्रकृतेरनुपलब्धेः कारणन्तु नास्ति तस्या अभाव अपि तु सुक्ष्मतैवास्ति अनुपलब्धेः कारणम्। महदादि कार्येभ्यः तेषां मूलकारणस्य प्रकृतेरूपलब्धिर्जायते। प्रकृतेः ज्ञानन्तु सामान्यतोदृष्टानुमानात् जायतेति सांख्यसीत्रे उल्लेखितम् – "सामान्यतोदृष्टादुभयसिद्धिः"[11] इति। व्यासभाष्यानुसारं प्रकृतेः न सत्ताऽस्ति नाप्यसत्ता।न सा प्रकृतिः सदस्ति नाप्यसत्। शशविषाणवत्सा प्रकृतिः नितान्तसद्रूपाऽपि नास्ति। एतद् व्यतिरिक्तः प्रकृतिस्त्वव्यक्तमलिङ्गञ्चास्ति। तच्चाह व्यासभाष्ये – "निःसत्तासत्तं निःसदसद् निरसद् अव्यक्तं लिङ्गं प्रधानम्"[12] इति। सर्वान् विकृतपदार्थान् उत्पादितत्वात् सा प्रकृतिरिति कथ्यते। सर्वेषां ज्ञानानां विरोधिनी भूतत्वात् 'अविद्या' इति कथ्यते। सा प्रकृतिरत्यन्तसुक्ष्मत्वात् तथा अदृश्यत्वात् कार्येभ्य एव तस्या अस्तित्वमनुमीयते। अचेतनत्वात् प्रकृतिः 'जड' इति कथ्यते।सदैव गतिशीलः शक्तिरूपत्वाच्च 'शक्ति' इत्युच्यते। सर्वेषां वस्तुनामव्यक्तावस्था भूतत्वात् अव्यक्तमित्युच्यते। तस्यां गुणत्रयाणां विद्यमानत्वात् 'त्रिगुणात्मिका' इत्युच्यते। नोत्पन्नत्वात् अजा

---

[10] सांख्यकारिका-८

[11] सांख्यसूत्रम्-१/१०३

[12] द्रष्टव्यम्, सांख्यदर्शन एवं अद्वैतवेदान्त, ममता गुप्ता, पत्रसंख्या-४२

इति कथ्यते।तस्याः विचित्रसृष्टेः विरचितत्वात् 'माया' इति कथ्यते। यथा तत्वत्रये उक्तम् - "प्रकृतिरित्युच्यते विकारोत्पादकत्वादविद्याज्ञानविरोधित्वात् माया विचित्रसृष्टिकरत्वात्"[13]। प्रकृतितत्वस्यापरैका संज्ञा प्रधान इति। सांख्यसिद्धान्ते प्रधानप्रसङ्गे पण्डित उदयवीरशास्त्रीणोक्तं – "प्रकर्षेण धीयते अन्तर्लीयते सर्वजगत् यस्मिंस्तत्"[14] इति। सर्वेषां कार्याणां विकारणां वा मूलकारणत्वात् सा मूलप्रतिरित कथ्यते।

प्रत्येकेषामुत्पन्नपदार्थानां कारणं स्यादेव, किन्तु प्रकृतेः किमपि कारणं नास्ति। यतो हि सा अनुत्पन्ना।उत्पन्नाः पदार्थाः परतन्त्राः भवन्ति। किन्तु प्रकृति अनुत्पन्नत्वात् स्वतन्त्रा इति। उत्पन्नाः पदार्थाः देशेषु कालेषु च सीमितं भवन्ति तथा संख्यया अनेकाः वर्तन्ते। किन्तु प्रकृति एका, सर्वव्यपका नित्याश्च वर्तते। सांख्यकारिकायामुक्तम् –

हेतुमदनित्यमव्यपि सक्रियमनेकमाश्रितमं
लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्।।[15]

सत्वरजस्तमसां गुणत्रयाणां साम्यावस्थैव प्रकृतिरिति कथ्यते। तत्र गौडपादभाष्ये दर्शितम् – "सत्वरजस्तमसां साम्यावस्था प्रधानम्"[16] इति। तत्त्वकौमुदीटीकायां प्रदर्शितम् – "प्रकरोति प्रकृतिः प्रधानम्, सत्वरजस्तमसां साम्यावस्था, सा अविकृतिः, प्रकृतिरेवेत्यर्थः"[17] इति।

---

[13] द्रष्टव्यम्, सांख्यदर्शन एवं अद्वैतवेदान्त, ममता गुप्ता, पत्रसंख्या-४२

[14] तदेव

[15] सांख्यकारिका-१०

[16] गौडपादभाष्यम्, सांख्यकारिका-१६

[17] तत्त्वकौमुदी, सांख्यकारिका-३

प्रकृतेः धर्माणि :- श्रीमदीश्वरकृष्णेन तस्य सांख्यकारिकायां प्रकृतेः धर्माणि वर्णीयते। तद्यथा -

"हेतुमदनित्यमव्यपि सक्रियमनेकमाश्रितमं
लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्।।
त्रिगुणमविवेकि विषयः सामान्यमचेतनं
प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरितस्तथा च पुमान्।।"[18]

अर्थात् प्रधानन्तु अहेतुमत्, नित्यम्, सर्वव्यापी, निष्क्रियम्, एकम्, अनाश्रितम्, लिङ्गरहितम्, स्वतन्त्रम्, त्रिगुणात्मकम्, विवेकरहितम्, विषयरथम्, सामान्यम्, अचेतनम् प्रसवधर्मि चेत्यादय धर्मयुतं भवति। उर्ध्वोक्तानि प्रकृतेर्धर्माणि निम्नप्रकारकतया विवेच्यते –

**अहेतुमत्** – अखिलविश्वस्य मूलकारणत्वात् तस्याः कारणाविद्यमानत्वादहेतुमदिति।

**नित्यम्** – कारणरहितत्वात् अनुत्पाद्यमानत्वाच्च अर्थात् आविर्भाव-तिरोभावरहितत्वाच्च नित्यमिति कथ्यते।

**सर्वव्यापी** – अखिलविश्वे अव्यक्तरूपेण व्याप्यत्वात् सर्वव्यापी इति।

**निष्क्रियम्** – सत्वरजस्तमसां गुणत्रयाणां साम्यावस्थाहेतोः निष्क्रियमिति।

**एकम्** – महदादि व्यक्ततत्वानां मूलभूतोपादानकारणत्वात् प्रधानमेकमिति। अनेकस्वीकरणे अनवस्थादोषप्रसङ्गात् त्यज्यः।

**अनाश्रितम्** – व्यक्ततत्वानि तु मूलकारणप्रधाने आश्रितानि विद्यन्ते। किन्तु प्रधानस्य कारणाभावात्तदनाश्रितम्।

**अलिङ्गम्** – "लयं गच्छति इति लिङ्गम्"[19] महदादिव्यक्ततत्वानि प्रलयकाले प्रधाने लयं गच्छति। प्रधानन्तु नित्यत्वादलिङ्गमिति।

---

[18] सांख्यकारिका-१०-११

**निरवयवम्** – आचार्यवाचस्पतिमिश्राणुसारं सावयवशब्दस्तु संयोगात्मकः। प्रधाने संयोगाभावान्निरवयवमिति।

**स्वतन्त्रम्** - प्रधानस्यास्तित्वं स्वतः तस्मिन्नेवाश्रितो वर्तते। अतः स्वतन्त्रमिति।

प्रकृतेः प्रधानस्य वा उपर्युक्तानि धर्माणि महदादिभ्यः व्यक्तेभ्यः विपरीतानि धर्माणि वर्तन्ते। महदादिव्यक्तैः सह समानताप्रतिपादितानि धर्णाणि तु –

**त्रिगुणम्** – सांख्यशास्त्रे प्रधानन्तु सत्वरजस्तमसां साम्यावस्था मन्यते। अतः त्रिगुणमिति।

**अविवेकी** – अचेतनत्वादविवेकीति।

**विषयः सामान्यञ्च** – महदादयसुक्ष्मव्यक्तपदार्थाः प्रकृतिश्च प्रमाणस्य विषयो मन्यते। तस्माद्धि प्रकृतिः व्यक्ताश्च सर्वेषां प्राणिनां विषयभूतत्वात् सर्वसाधारणं सामान्यमिति च मन्यते।

**अचेतनम्** – चेतनरहितत्वादचेतनमिति।

**प्रसवधर्मी** – प्रकृतेः अखिलविश्वस्य परिणामस्वरूपात् सृष्चार्जायते, अतः प्रकृतिस्तु प्रसवधर्मीति।

परमसुक्ष्मतत्वं हि वर्तते प्रकृतितत्वमिति।अतः प्रकृतेः सिद्धिस्तु तर्कैः कृतं सांख्यशास्त्रे। सांख्यकारिकाकारेणेश्वरकृष्णेन प्रकृतेरस्तित्वप्रतिपादनार्थमुक्तम् –

भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च।
कार्यकारणविभागादविभागाद्वैश्वरूपस्य।।[20]

**मायातत्त्व-प्रकृतितत्त्वयोः तुलनात्मकमध्ययनम्** :- प्रागेवास्मभिः ज्ञायन्ते यत् – मायायाः समार्थकशब्दास्तु अज्ञानम्, अविद्यादि। अद्वैतवेदान्तस्यातीवगुरुत्वपूर्णविषयो वर्तते मायेति। अद्वैतवेदान्तस्येषा

---

[19] सांख्यकारिका, स्वामी दिवाकरानन्द, पत्रसंख्या-७४

[20] सांख्यकारिका-१५

माया तु सांख्यशास्त्रीय प्रकृत्या सह बहुलांशे सादृश्ययुता वर्तते।यतो हि सृष्टेरालोचना प्रसङ्गे उभयोः मायाप्रकृत्योः सारूप्यता दृश्येते। असारूप्यताऽपि स्यात्। निम्नलिखितेन प्रदर्श्यते। श्वेताश्वतरोपनिषद्यस्माभिः परिलक्ष्यन्ते –

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्।।[21]

माया त्वेकैव प्रकृतिरप्येकैव च। किन्तु ऋग्वेदसंहितायाः षष्ठमण्डले मायायाः बहुरूपता प्रतिफलितं स्यात्– "इन्द्रो मायाभिः पुरुरूप ईयते......"[22] इति। अर्थात् इन्द्रस्तु तस्य मायाभिः विश्वरूपं धारयति। एतादृशबहुवचनान्तोक्त्या वक्तुं शक्यते – माया तु नास्त्येका अपि तु बह्वी। किन्तु न तत्सत्यमिति। आलोच्योद्धृतिरियं मायास्थितविविधशक्तिनां सूचयति। अर्थात् मायागतसत्वरजस्तमसां गुणानां सूचयतीति। तथैव हि सत्वरजस्तमसां गुणत्रयाणामाश्रयस्वरूपा प्रकृतिरप्येका नास्त्यनेका इति। मायायाः एकत्वप्रतिपादनार्थं श्वेताश्वतरोपनिषद्याह –

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः
सृजमानां स्वरूपा।
अजोह्येको जुषमाणोऽनुशेते जहात्येनां
भुक्तभोगामजोऽन्यः।।[23]

उपमानवत् प्रकृतेरेकत्वमपि प्रतिपादितमभवत् श्रीमद्वाचस्पतिमिश्रविरचितसांख्यतत्त्वकौमुद्याम् तत्राह टीकाकारेण -

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः
सृजमानां नमामः।

---

[21] श्वेताश्वतरोपनिषद्- ४/१०

[22] बृहदारण्यकोपनिषद्-२/५/१९

[23] श्वेताश्वतरोपनिषद्-४/५

 ISSN 2320-2025

अजा ये तां जुषमाणां भजन्ते जहत्येनां
भुक्तभोगां नुमस्तान्॥[24]

विद्यारण्यमुनेः 'पञ्चदशी' इति ग्रन्थस्य तत्त्वविवेकप्रकरणे सत्वरजस्तमगुणसमन्विता प्रकृतिः द्विविधमित्युल्लेखितं स्यात्। तत्रोच्यते मुनिना विद्यारण्येन –

चिदानन्दमयब्रह्मप्रतिविम्बसमन्विता।
तमोरजः सत्वगुणा प्रकृतिर्द्विविधा च सा॥[25]

तत्र विशुद्धसत्वप्राधानाप्रकृतिं माया मलिनसत्वप्रधानाप्रकतिमविद्येति चोच्यते। तद्यथा –

सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते।
मायाबिम्वो वशीकृत्य तां स्यात् सर्वज्ञ
ईश्वरः॥[26]

एवं हि प्रकृतेर्द्विविधत्वं प्रतिपादनादनन्तरं मायायाः पर्यायवाची अज्ञानस्यापि शक्तिद्वयस्योल्लेखं कृतं श्रीमत्सदानन्देन तस्य वेदान्तसारनामके ग्रन्थे। "अस्य अज्ञानस्य आवरणविक्षेपनामकं शक्तिद्वयमस्ति"[27] इति।

माया तु सदसद्भ्यामनिर्वचनीयमिति। अतो ह्यव्यक्ताऽपि सा कथ्यते। प्रसिद्धशङ्कराचार्येण तस्य विवेकचूडामणि इति ग्रन्थे मायान्तु अव्यक्तरूपेण वर्णीयते अपि च कार्येणैव तस्याः विद्यमानतायाः परिचये दीयते। यथाह -

---

[24] तत्त्वकौमुदी, सांख्यकारिका-१

[25] पञ्चदशी-१/१५

[26] पञ्चदशी-१/१६

[27] वेदान्तसार, ब्रह्मचारी मेधाचैतन्य, पत्रसंख्या-७३

अव्यक्तनाम्नी
परमेशशक्तिरनाद्यविद्यात्रिगुणात्मिका परा।
कार्यानुमेया सुधियैव माया यया जगत् सर्वमिदं
प्रसूयते॥[28]

पुनश्चाह -

सन्नाप्यसन्नाप्युभयात्मिका नो
भिन्नाप्यभिन्नाप्युभयात्मिका नो।
सङ्गाप्यनङ्गाप्युभयात्मिका नो
महाद्भूतानिर्वचनीयरूपा॥[29]

अर्थात् सा माया अविद्या वा सन्नास्ति, असदपि नास्ति उभयात्मिकाऽपि च नास्ति। भिन्ना नास्ति, अभिन्नापि नास्ति उभयात्मिकाऽपि च नास्ति। साङ्गानास्ति, अनङ्गापि नास्ति, उभयात्मिकाऽपि च नास्ति।महोद्भूता अत्याश्चर्यरूपा वा, अनिर्वचनीयरूपेति चोच्यते सा माया अविद्या वेति। अन्यस्मिन् पक्षे प्रकृतिस्तु मायायाः सदृशवद्विद्यमानत्वादपि अव्यक्तरूपेणैव परिचितिं लभे। किन्तु महदाद्यः कार्यविषयाणां परमकारणरूपेण प्रकृतिमेव स्वीकर्तव्यम्। यतो हि मायायाः सधर्मवत् प्रकृतेरस्तित्वमपि कार्येणैवोपलभ्यते। तच्छ्रीमदीश्वरकृष्णेनाह -

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्
कार्यतस्तदुपलब्धेः।
महदादि तच्च कार्यं प्रकृतिस्वरूपं
विरूपञ्च॥[30]

[28] विवेकचूडामणि-१०८

[29] तदेव- १०९

[30] सांख्यकारिका-८

मायाप्रकृत्योः सारूप्यदर्शनानन्तरम् असारूप्यता वर्णीयते अधवर्णीतेन। तद्यथा - जगदोत्पत्तेः प्रक्रियायां प्रकृतिस्तूपादानकारणरूपेण मन्यते – "उपादाननियमात्"[31] इति। सांख्यकारिकायां सत्कार्यवादप्रतिपादयित्वा प्रकृतेरूपादानकारणतोल्लेख्यते। तत्र श्रीमदीश्वरकृष्णेनाह –

असदकारणादुपादानग्रहणात्
सर्वसम्भावाभावात्।
शक्तस्य शक्यकारणात् कारणभावाच्च
सत्कार्यम्।।[32]

कारणकार्यसम्बन्धतया प्रकृतिस्तु महदाद्यभूतपर्यन्तानां व्यक्तानामुपादानकारणं वर्तते। अन्यस्मिन् पक्षे माया तु जगदोत्पत्तेः प्रक्रियायामुपादानकारणं नैव भवतीति। अद्वैतवेदान्ते माया त्वनिर्वचनीयत्वादनित्यैव। किन्तु प्रकृतिस्तु नित्येति। यतो हि सांख्यकारिकायामुच्यते –

हेतुमदनित्यमव्यापिसक्रियमनेकमाश्रितं
लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्।।[33]

व्यक्ततत्वानां विपरीतधर्मिणी भूतत्वात् अव्यक्तप्रकृतिस्तु नित्येति कथ्यते। जगदोत्पत्तेः मूलकारणस्य प्रकृतेः किमपि कारणं न स्यात्। यतो हि सा मूलप्रकृतिरविकृतिः अनवस्थादोषप्रसङ्गादिति। महामुनिना कपिलेनाह – "मूलेमूलाभावादमूलं मूलम्"[34] इति। अर्थात् मूलप्रकृतेर्मूलाभावात्, कारणाभावादमूलं यत् कारणं तन्मूलम्, सैव प्रकृतिरिति।

[31] सांख्यसूत्रम्- १/११५

[32] सांख्यकारिका-९

[33] सांख्यकारिका-१०

[34] सांख्यसूत्रम्-१/६५

## सन्दर्भग्रन्थसूची

*अद्वैतवेदान्त मे मायावाद*, शशिकान्त पाण्डेय, विद्यानिधि प्रकाशन, दिल्ली, संस्करण-२०१९

*उपदेशसाहस्री*, गजाननशास्त्री मुसलगाँवकर, श्रीदक्षिणामूर्ति मठ प्रकाशन, वाराणसी, संस्करण-२०१४

*पञ्चदशी*, रामावतार विद्यभाष्कर, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, संस्करण-२०१७

*विवेकचूड़ामणि*, स्वामी वेदान्तानन्द, उद्बोधन कार्यालय, कलकाता, संस्करण-२०१६

*वेदान्तदर्शनम्*, पण्डित दुर्गाचरण सांख्य वेदान्ततीर्थ, देव साहित्य कुटिर प्राइभेट लिमिटेड, कलकाता

*वेदान्तसारः*, ब्रह्मचारी मेधाचैतन्य, संस्कृत पुस्तक भाण्डार, कलकाता, संस्करण-१४२४ बङ्गाब्द

*सर्वदर्शन संग्रह(खण्ड-2)*, सत्यज्योति चक्रवर्ती, साहित्यश्री, कलकाता, संस्करण-२०१४

*सांख्यकारिका*, स्वामी दिवाकरानन्द, संस्कृत बुक डिपो, कलकाता, संस्करण-१९७६

*सांख्यकारिका*, सुधांशु कुमार षड़ङ्गी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करण-२०१६

*सांख्यदर्शन एवं अद्वैत वेदान्त*, ममता गुप्ता, चौखम्बा कृष्णदास अकादमी, वाराणसी, संस्करण-२००७

*सांख्यदर्शनम्*, जनार्दनशास्त्री पाण्डेय, मोतिलाल बनारसी दास, दिल्ली, संस्करण-१९८९

# भारतवसुन्धरासान्त्वनगीतिकाव्ये भारतवसुन्धरायाः सौन्दर्यवर्णनम्

Rahul Mandal

भारतीयसंस्कृतसाहित्यजगति रामायण-महाभारत-पुराणानि प्राचीन संस्कृतिभाण्डगाररूपेण वर्तन्ते। एतेषां काव्यानाम् आधारेणैव परवर्तिनः महाकवयः काव्यानि महाकाव्यानि च रचितवन्तः। तेषां ग्रन्थाः प्राचीनसमाजस्य तत्कालीनस्थित्यनुसारं लिखिताः। किन्तु आधुनिककवयः प्राचीनकवीनां ग्रन्थान् परिशील्य तत्र विद्यामानान् पुरातनविषयान् आश्रित्य आधुनिकसमाजस्य वर्णनं तेषां काव्येषु कृतवन्तः। प्राचीनकवीनां ग्रन्थानां वर्णनायाः अपेक्षया आधुनिककवयः तेषां काव्येषु तान् विषयान् अथवा वर्तमानजगति विद्यमानान् नूतनान् विषयान् वर्णयन्ति। साहित्यं समाजस्य दर्पणः भवति। समाजानुगुणं साहित्यमपि परिवर्तते। तथैव सम्प्रति आधुनिकसाहित्यरचना जायमाना अस्ति। किन्तु एतत्तु सत्यमेव यत् आधुनिकाः यद्यपि समाजचित्राणि, भौगोलिकचित्राणि स्वीयलेखनीद्वारा स्फुटयन्ति। तथापि तत्र भारतदेशस्य अपरूपवैभवगाथा तु चाकचक्येन विधीयते। तेन भारतदेशस्य अलौकिकरूपम् अपि दृष्टिगोचरी भवति।

संस्कृतसाहित्यजगति काव्यशास्त्रस्य विशिष्टस्थानं वर्तते। तत्र अनेके काव्यग्रन्थाः विराजन्ते। गीतिकाव्यानां विशिष्टस्थानं वर्तते एव। कवेः ताराचरणभट्टाचार्यमहोदयस्य एकमेव गीतिकाव्यमिदं

